शूद्रकमलाकरे शूद्राणां पुराणश्रवणेऽधिकारं इत्यर्थं प्रतिपादयद्भिः—पठन्द्विजो वागृषभत्वमीयादस्मिन् श्लोके जनश्च शूद्रोऽपि महत्वमीयादित्यस्य स्थाने श्रवणंश्च शूद्रोऽपि महत्वमीयादिति पाठः स्वीकृतः। स तु स्पष्ट वाल्मीकिमुनि वचन विरुद्धः। अतो हेयः। भट्ट महोदयानां मते "शूद्राणां पुराणश्रवणमात्रेऽधिकारः। इदमपि विप्रादि द्वारैव। तत् सिद्धं शूद्रस्य विप्रद्वारा पुराणश्रवणेन ज्ञानमिति" तेषां निर्णय—तथा च 'एवं पुराण विष्णुसहस्रनाम चण्डीस्तोत्रादि पाठेऽप्यनधिकारः। श्रवणमात्रेऽधिकारेण पाठाऽप्रसक्तेः। तदुक्त हरिवंशे 'सुगतिमियाच्छ्रवणाच्च शूद्रजातिरिति।' अतएव भारते विष्णुसहस्रनामसु—

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ।

इत्यत्र शूद्र श्रवणेनैवेति शङ्कराचार्येण व्याख्यातम्। किं बहुना शूद्रकर्तृक स्नानदान श्राद्धादौ विप्रस्यैव पौराणमंत्रपाठः शूद्रस्य तु श्रवणमात्रम् पुराणपाठाभावेन तन्मत्रेषु पाठाप्रसङ्गाच्च" इति। एतद

क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा।
तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः॥

भागवते।

तस्य च पठने अशेषाणां नराणामधिकारो वर्तते अस्मिन्नर्थे भागवतमेव प्रमाणम्। यथा—

विप्रोऽधीत्याऽऽप्नुयात्प्रज्ञां राजन्योदधिमेखलाम्।
वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात्॥

तथा च—

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
तत्र ज्ञान विरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥

भागवते॥

भागवतान्तर्गत पृथुचरितस्यान्ते च—

य इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत्।
श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात्॥
ब्राह्मणो ब्रह्म वर्चस्वी राजन्यो जगतीपतिः।
वैश्यः पठन् विट्पतिः स्यात् शूद्रः सत्तमतामियात्॥

विष्णुपुराणान्ते च—

यत्रादौ भगवांश्चराचरगुरुर्मध्ये तथान्ते च सः
ब्रह्मज्ञानमयोऽच्युतोऽखिल जगन्मध्यान्तसर्गप्रभुः।
तच्छृण्वन् पुरुषः पवित्रपरमं भक्त्या पठन् धारयन्
प्राप्नोत्यस्ति न तत्समस्तभुवनेष्वेकान्तसिद्धिर्हरिः॥

एवमेवान्येषु पुराणेषु शूद्राणां पुराण पठने अधिकारः प्रतिपादितः। यथा

नारदीये उत्तर खंडे ८२ अध्याये।

तदिदं भगवान्साक्षान्नारदोऽध्यात्मदर्शनः।
वेदव्यासाय मुनये रहस्यं निर्दिदेश ह॥

व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्मणाञ्च त्यागेन जायन्ते वर्णसंकराः ॥
प्रतिकूलं वर्त्तमाना बाह्या बाह्यतरान्पुन ।
हीना हीनान्प्रसूयन्ते वर्णान् पञ्चदशैव तु ॥

अत्र मेधातिथिः

'एवं चतुर्वर्णानां प्रत्येकं पञ्चदशधा भेदाः षष्टिः संपद्यन्ते मुख्याश्चत्वारो वर्णाः सा चतु:षष्टिर्भवंति । परस्परसंपर्कात् तेषा मन्येऽनन्तभेदा भवन्ति ।—वर्णान् पञ्चदशैवेति 'नास्ति तु पञ्चमः' (१०-४) इति पञ्चमस्य वर्णत्वाभावात् पञ्चदशसु वर्णत्वमुपचाराद् द्रष्टव्यम् ।'

पुनरपि मनुः

स्वजातिजानन्तरजा षट् सुता द्विजधर्मिणः ।
शूद्राणान्तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ।

तत्र मेधातिथिः

'स्वजातीयास्त्रैवर्णिकेभ्यः समानजातीयासु जातास्ते द्विज धर्म्माण इति एतत्सिद्धमेवानूद्यते । अनन्तरजा अनुलोमा ब्राह्मणात् क्षत्रियावैश्ययोः क्षत्रियाद्वैश्यायां जातास्तेपि द्विजधर्माण उपनेया इत्यर्थः । उपनीताश्च द्विजातिधर्म्मैः सर्वैरधिक्रियन्ते । ये पुनरपध्वंसजाः संकरजास्ते शूद्राणां सधर्माणः समानाचारास्त द्धर्मैरधिक्रियन्त इत्यर्थः ।'

अतः यथा शूद्राणां इतिहास पुराणानां पठने श्रवणे चाधिकारस्त थैव सर्वेषामपध्वंसजानां इतिहास पुराणानां पठने श्रवणे चाधिकार इति सिध्यति ।

तथापि

'भट्टकमलाकरैः शूद्रकमलाकरे अथ शूद्रस्य मन्त्र विचार इति प्रसज्यैव लिखितम्—"तत्र अविद्यत्वाद्वेदमन्त्रेनाऽधिकारः । व्यासोऽपि—

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ।
वेद मन्त्र स्वधा स्वाहा वषट् कारादिभिर्विना ॥

तथैव वायुपुराणान्ते—

गयाख्यानमिदं पुण्यं यः पठेत्सततं नरः ।
शृणुयाच्छ्रद्धया यस्तु स याति परमां गतिम् ॥

ब्रह्मपुराणान्ते—

यज्ज्येष्ठशुक्लद्वादश्यां स्नात्वा वै यमुनाजले ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति पुरुषः फलम् ॥
तदाप्नोति फलं सम्यक् समाधानेन कीर्तनात् ।
पुराणस्य हिते विप्रा केशवार्पितमानसः ॥
यत्फलं श्रियमालोक्य पुरुषोऽथ लभेन्नरः ।
तत्फलं समवाप्नोति यः पठेच्छृणुयादपि ॥
इदं यः श्रद्धया नित्यं पुराणं वेदसंमितम् ।
यः पठेच्छृणुयान्मर्त्यः स याति भुवनं हरेः ॥
श्रावयेद् ब्राह्मणो यस्तु सदा पर्वसु संयतः ।
एकादश्यां द्वादश्यां च विष्णुलोकं स गच्छति ॥
इद यशस्यमायुष्यं सुखदं कीर्तिवर्द्धनम् ।
बलपुष्टिमद नृणां धन्यं दुःस्वप्ननाशनम् ॥
त्रिसन्ध्यं यः पठेद्विद्वान् श्रद्धया सुसमाहितः ।
इदं वरिष्ठमाख्यानं स सर्वमीप्सितं लभेत् ॥
रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयाद्विमुच्यते भीत आपदापन्न आपदः ॥
जातिस्मरत्वं विद्यां च पुत्रान्मेधां पशून्धृतिम् ।
धर्मं चार्थं च कामं च मोक्षं तु लभते नरः ॥
यान् यान् कामानभिप्रेत्य पठेत्प्रयतमानसः ।
तांस्तान्सर्वानवाप्नोति पुरुषो नात्र संशयः ॥
यश्चेदं सततं शृणोति मनुजः स्वर्गापवर्गप्रदं
विष्णुं लोकगुरुं प्रणम्य वरदं भक्त्येकचित्तः शुचिः ।
भुक्त्वा चात्र सुखं विमुक्तकलुषः स्वर्गे च दिव्यं सुखं
पश्चाद्याति हरेः पदं सुविमलं मुक्तो गुणैः प्राकृतैः ॥

महर्षिणा व्यासेन

स्त्री शूद्र द्विज बन्धूनां त्रयी न श्रुतिगोचरा।
कर्म श्रेयसि मूढानां श्रेय एवं भवेदिह॥

इति भारत माख्यानं 'वेदैश्चतुर्भिः संयुक्तं' 'सर्व श्रुति समूह' 'वेदार्थैर्भूषित' अतश्च 'वेदैः संमितं' कृपया प्रकाशितम्, यदा 'सर्व वेदेतिहासानां सारं सारं समुद्धृत्य' महाभागवतं प्रकाशितम् 'यत्कथासु तु वेदार्थः श्लोके श्लोके पदे पदे', यदाहि अन्येषु पुराणेषु च सर्व वर्णानामुपकाराय स्वल्पमेव रूपान्तरं कृत्वा बहवः श्रुतयः निवेशिताः, यदा हि विष्णु शिव ब्राह्म पाद्मादीनि पुराणादीनि प्रकाशितानि येषु बहुषु स्थानेषु ओङ्कारः अथवा ओङ्कार-संयुक्ता अनेके मन्त्राः निवेशिताः, तदारभ्यैव पुराणेषु निवेशितस्योंकारस्यो च्चारणे स्त्रीणां शूद्राणा मधिकारः निर्विवादरूपेण स्थापितः।

अत्र बहूनि उदाहरणानि

महर्षिणा व्यासेन विष्णु सहस्र नामान्ते 'सर्व प्रहरणायुध ओमिति' शब्दः प्रयुक्तः। तस्य सहस्र नामस्तोत्रस्य यथा श्रवणे तथैव परिकीर्तने शूद्राणामधिकारः स्पष्टमेव प्रतिपादितः 'शूद्रः सुखमवाप्नुया दि'ति।

श्रीमद्भागवतेच यस्य पठने शूद्राणामधिकारः तत्रैव प्रतिपादितः 'शूद्रः शुध्येत पातकात्' इति प्रायः प्रत्येक स्कन्धारम्भे ॐ नमो भगवते वासुदेवायेति मन्त्रो गर्जति।

तत्रैव—षष्ठस्कंधे नारायणवर्म कथने।

धौताङ्घ्रि पाणिराचम्य सपवित्र उदङ्मुखः।
कृतस्वाङ्ग करन्यासो मन्त्राभ्यां वाग्यतः शुचिः॥
नारायणमयं वर्म सन्नह्येद्भय आगते।
पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि॥

तथा च अग्निपुराणे

अग्निनोक्तं पुराणं यदाग्नेयं ब्रह्म संमितम् ।
भुक्ति मुक्ति प्रदं दिव्यं पठतां शृण्वतां नृणाम् ॥

अ० ३८३ पठन्नाग्नेयकं नित्यं शृण्वन्वापि पुराणकम् ।
भक्तो वशिष्ठ मनुजः सर्व पापै प्रमुच्यते ॥
शृण्वन्विप्रो वेदवित्स्या त्क्षत्रियः पृथिवीपति ।
ऋद्धि प्राप्नोति वैश्यश्च शूद्रश्चारोग्य मृच्छति ॥
यः पठेच्छृणुया न्नित्यं समदृग्विष्णु मानसः ।
ब्रह्माग्नेयं पुराणं स तत्र नश्यन्त्युपद्रवाः ॥

स्कंदपुराणे प्रभास खण्डे

इदं पुराण मायुष्यं चतुर्वर्ण सुखप्रदम् ।
निर्मितं षण्मुखेनेह नियतं सुमहात्मना ॥
यो नरः शृणुयाद्भक्त्या दिनानि च कियन्ति वै ।
सर्वार्थ सिद्धो भवतिर्य एतत्पठते नरः ॥
शृण्वतः पठत इचैव सर्वकामप्रदो नृणाम् ।
पुण्य श्रुत्वा पुराण वै दीर्घ मायुश्च विन्दति ॥
महीं विजयते राजा शत्रूं श्चाप्यधितिष्ठति ।
वेदविच्च भवेद्विप्रः क्षत्रियो राज्य माप्नुयात् ॥

पद्मपुराणे भूमिखण्डे

द्वादशैव सहस्राणां पद्माख्या सातु संहिता ।
कलौ युगे पठिष्यन्ति मानवा विष्णु तत्पराः ॥

तत्रैव प्रथम सृष्टि खंडे

पुण्यं पवित्र मायुष्यं सर्व पाप विनाशनम् ।
पुराण मेतत्कथितं तीर्थ श्राद्धानुवर्णनम् ॥
शृणोति यः पठेद्वापि श्रीमान्संजायते नरः ।
सर्व पाप विनिर्मुक्तः सलक्ष्मीकं हरिं लभेत् ॥

तत्रैव उत्तर खंडे

एतत्ते सर्व माख्यात पुराणं वेद संमितम् ।
ब्रह्मणा कथितं राजन् मनोः स्वायंभुवोऽन्तरे ॥

शुक्ले मार्गशिरे पक्षे योषिद् भर्त्तुरनुज्ञया।
आरभेत व्रतमिदं सार्वकामिकमादितः॥
स्नात्वा शुक्लदती शुक्ले वसीतालंकृतांबरे।
पूजयेत्प्रातराशात्प्राग् भगवन्तं श्रिया सह॥
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूति पतये सह महाविभूतिभिर्बलिमुपहराणीति॥

अनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवास उपवीत विभूषण गंधपुष्पधूपदीपोपहाराद्युपचारांश्च समाहित उपाहरेत्॥

हविःशेषं तु जुहुयादनले द्वादशाहुतीः।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति।
श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ।
भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसम्पदः॥
प्रणमेद्दण्डवद् भूमौ भक्तिप्रह्वेण चेतसा।
दशवारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत्॥

अष्टमस्कंधे षोडशाध्याये

अदिति पयोव्रतकथायां च—

शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति।
ससर्पिः सगुडं दत्वा जुहुयान्मूलविद्यया॥
इति भगवान् कश्यपः देवीमदिति मुपदिशतिस्म।
मूल मन्त्रस्तु ॐ नमो नारायणाय इति॥

पद्मपुराणे भूमिखंडे वासुदेवाभिधाननाम्नि स्तोत्रे—

विज्वल उवाच—

तवार्थे पृच्छितस्तातस्तेन मे कथित च यत।
तत्तेऽद्याहं प्रवक्ष्यामि शाश्वत शृणु सत्तम॥
ॐ अस्य श्री वासुदेवाभिधानस्तोत्रस्यानुष्टुप् छन्दः।
नारद ऋषिः। ॐकारो देवता। सर्वपातकनाशाय
चतुर्वर्गसाधनार्थे च विनियोगः॥

कमलाकरमतं रामायण महाभारत महाभागवत विष्णुपुराणादि पूर्वोद्धृतवचनमातविरुद्धमतो नादरणीयं विद्वद्भिः ॥

पुराणान्तर्गत मंत्राणामुच्चारणे सर्वेषां श्रद्धाभक्ति-समन्वितानामधिकारः ।

भट्टकमलाकरा अपि मन्यते यत्पुराणं श्रवणविधानादेव तदन्तर्गत वैदिक मन्त्रश्रवणेऽपि न दोषः ।

अत. यदि पूर्वोद्धृत रामायण महाभारत भागवत विष्णुपुराणादि वचसां प्रामाण्येन स्त्रीशूद्र द्विजबन्धूनां यथा पुराणश्रवणे तथैव पुराणाऽध्ययनेऽप्यधिकारोऽस्तीति स्थितः तर्हि तदन्तर्गतानां मन्त्राणामुच्चारणे तेषामधिकार इति स्वत. सिद्ध्यति । अतएवोक्त

श्रीभट्टकुमारिलैः मीमांसा तन्त्रवार्तिके ।

'तानेव वैदिकान् धर्मान् भारतादि निवेशितान् ।
स्वाध्यायनियमं हित्वा लोक बुद्ध्या प्रयुञ्जते । इति

तथापि द्विजस्त्रीणां तथा शूद्राणां प्रणवसंयुतानां पौराणिकमंत्राणां ग्रहणेऽधिकारः इति अन्यैरपि प्रमाणैः प्रदर्श्यते ।

आदौ स्मर्तव्य मेतत् यत् यस्य विराट्पुरुषस्य
मुखतो ब्राह्मणो जात बाहुभ्यां क्षत्रियस्तथा ।
ऊर्वोर्वैश्यश्च तस्यैव पद्भ्यां शूद्रो व्यजायत ॥

वर्णाश्चत्वार एव । तथाहि मनुः

ब्राह्मण क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातय ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चम ॥
सर्व वर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ।
आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते ॥
स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥

मार्कंडेय उवाच—

ॐ नमो भगवते वासुदेवाय ।

ॐ नमो नारायणाय ।

एतौ मया वः कथितौ पवित्रौ
मंत्राविमौ पापहरौ धरण्याम् ।
परायणौ सर्वतपस्विनां वरौ
वरस्य भूतौ भुवनेषु नित्यम् ॥

ब्रह्मपुराणे

एकषष्ठितमेऽध्याये विष्णुपूजन विधौ अष्टाक्षर विधानेन विष्णुपूजनविधिः विपुलतया वर्णितः । एष पूर्णोऽध्यायः विशेषतया पठनीयः ।

संक्षेपतः—

अष्टाक्षरं ततो मंत्रं विन्यसेच्च यथाक्रमम् ।
तेन व्यस्तनमस्तेन पूजनं परमं स्मृतम् ॥
एवं संपूज्य देवेशं मण्डलस्थं जनार्दनम् ।
लभेदभिमतान्कामान्नरो नाऽन्यत्र संशयः ॥
ॐकारादिसमायुक्तं नमः कारान्तदीपितम् ।
तन्नाम सर्वसत्वानां मंत्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पं निवेदयेत् ॥
एकैकस्य प्रकुर्वीत यथोद्दिष्टं क्रमेण तु ॥
जपं चैव प्रकुर्वीत मूलमंत्रेण मंत्रवित् ।
अर्चनं ये न जानन्ति हरेर्मंत्रैर्यथोदितम् ।
ते तत्र मूलमंत्रेण पूजयन्त्यच्युतं सदा ॥

नृसिंहपुराणे ।

द्विषष्ठितमेऽध्यायें पुरुषसूक्तेन विष्णोरर्चनविधिः प्रोक्त.. तदनन्तरं त्रिषष्ठितमेऽध्याये

नृसिंह तापिनीये—"सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्राय
च्छति। पराशर भाष्येऽप्येवं। रामतापिनीये-सावित्रीं लक्ष्मीं यजुः
णवं यदि जानीयात् स्त्री शूद्रः स मृतोऽधो गच्छति।" इत्यादि

किंतु एतत् वैदिक विधिनोच्चारितस्योङ्कारस्य विषय एव संघटते न तु स्मार्त मन्त्रस्थस्य।

तथा युगपरिवर्तनात्केषुचिद्धार्मिकेषुव्यवहारेषु परिवर्तनं जायते।

देवाह मनुः

अन्ये कृत युगे धर्मास्त्रेतायां द्वापरेऽपरे।
अन्ये कलियुगे नृणां युगह्रासानुसारतः॥
तपः परं कृत युगे त्रेतायां ज्ञानमुच्यते।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे॥

भागवते च—

यत्फलं नास्ति तपसा न योगेन समाधिना।
तत्फलं लभते सम्यक् कलौ केशव कीर्तनात्॥

अतएव शुक्रनीतौ धर्मकामानां धर्माध्यक्षाणां पण्डितानां
र्तव्यता दर्शिता। यथा—

वर्तमानाश्च प्राचीना धर्माः के लोक संस्थिताः।
शास्त्रेषु के समुद्दिष्टा विरुध्यन्ते च केऽधुना॥
लोक शास्त्र विरुद्धाः के पण्डितस्तान् विचिन्त्य च।
नृपं सम्बोधयेत्तैश्च परत्रेह सुखप्रदैः॥

तथाहि याज्ञवल्क्यः।

राजा कृत्वा पुरे स्थान ब्राह्मणान्यस्य तत्र तु।
त्रैविद्यं वृत्तिमद् ब्रूयात्स्वधर्मः पाल्यतामिति॥
निज धर्माविरोधेन यस्तु सामयिको भवेत्।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः॥ इति॥

इतो हि यदा सर्वं भूत हितैषिता

ॐ नमो नारायणायेति मंत्रः सर्वार्थ साधक ।
भक्तानां जपतां तात स्वर्गमोक्षफल प्रदः ॥
सर्ववेदरहस्येभ्यः सार एव समुद्धृत ।
विष्णुना वैष्णवानां हि हिताय मनुजां पुरा ॥
एव ज्ञात्वा ततो विप्रः अष्टाक्षरमिमं स्मरेत् ।
स्नात्वा शुचिः शुचौ देशे जपेत्पाप विशुद्धये ॥
स्नात्वा शुचिर्जपेद्यस्तु नमो नारायणं व्रतम् ।
स गच्छे त्परमं देव नारायणमनामयम् ॥
गन्धपुष्पादिभिर्विष्णुमनेनाराध्य यो जपेत् ।
महापातकयुक्तोऽपि मुच्यते नात्र संशयः ॥
हृदि कृत्वा हरिं देवं मन्त्रमेनं तु यो जपेत् ।
सर्वपापविशुद्धात्मा स गच्छेत्परमां गतिम् ॥
आयुष्यं धनपुत्रांश्च पशून्विद्यां मह यशः ।
धर्मार्थ काम मोक्षांश्च लभते जपतत्परः ॥
एत त्सत्यं च धर्मंच वेदश्रुति निदर्शनात् ।
एतत्सिद्धि कर नृणां मंत्ररूपं न संशयः ॥
अष्टाक्षरमिमं मंत्रं सर्वदुःखविनाशनम् ।
जप पुत्र महा बुद्धे यदि सिद्धिमभीप्ससि ॥
इदं स्तवं व्यास मुखाद्धि निःसृतं
सन्ध्यात्रये ये पुरुषाः पठन्ति ।
ते धौतपाण्डुरपटा इव राजहंसा
संसार सागर मपेतभयास्तरन्ति ॥

[illegible]ः श्रीविष्णोः[illegible] [illegible]
[illegible] ।

[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] । [illegible]

भविष्यपुराणे ।

[illegible] ।
[illegible] ॥

मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत्।
ॐ नमो नारायणायेति विपर्ययमथापि वा।
करन्यासं ततः कुर्याद्द्वादशाक्षर विद्यया॥

'इति स्पष्टम्। तस्यांते च 'य इदं शृणुयात्काले यो धारयति चादृतः' इतिवचोभ्यां द्वादशाक्षराष्टाक्षर षडक्षराः प्रणवयुताः मंत्राः सर्वेषां हिताय इति प्रतिपादितः।

श्रीमद्भागवते चतुर्थ स्कंधे भगवान् नारदः ध्रुवमुपदिशन्नकथयत्—

जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज।
यं सप्त रात्रं प्रपठन् पुमान् पश्यति खेचरान्॥

ॐ नमो भगवते वासुदेवाय—

मन्त्रेणानेन देवस्य कुर्याद् द्रव्यमयीं बुधः।
सपर्यां विविधैर्द्रव्यैर्देश काल विभागवित्॥

पञ्चम स्कन्धे ॐकार युताः बहवः मन्त्राः शोभन्ते। तेभ्य एक एव मन्त्रोऽत्रोक्रियते।

श्रीशुक उवाच।

तत्रैव किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपास्ते। स्वयं चेदं गायति।

ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति॥

षष्ठस्कंधे पचमेऽध्याये च दक्षपुत्रा 'आराधयन् मंत्रमिमभ्यस्यन्त हंसपतिम्—

ॐ नमो नारायणाय पुरुषाय महात्मने विशुद्धसत्वधिष्ण्याय महाहंसाय धीमहि।

षष्ठस्कंधे एकोनविंशतितमेऽध्याये स्त्रीणां पुंसवनव्रतवर्णने—

श्रीशुक उवाच—

किं तस्य बहुभिर्मन्त्रैः किं तीर्थैः किं तपोऽध्वरैः ।
यस्यों नमः शिवायेति मन्त्रो हृदयगोचरः ॥
मन्त्राधिराजराजोऽयं सर्व वेदान्त शेखरः ।
सर्व ज्ञान निधानं च सोऽयं चैव षडक्षरः ॥
तस्मात्सर्व प्रदो मन्त्रः सोऽयं पञ्चाक्षरः स्मृतः ।
स्त्रीभिः शूद्रैश्च संकीर्णैः धार्यते मुक्तिकांक्षिभिः ॥

तथा च शिवपुराणे वायवीय संहितायामुत्तरभागे द्वादशाध्याये

श्रीकृष्ण उवाच—

महर्षिवर सर्वज्ञ सर्वज्ञान महोदधे ।
पञ्चाक्षरस्य माहात्म्य श्रोतुमिच्छामि तत्त्वतः ॥

उपमन्युरुवाच ।

पञ्चाक्षरस्य माहात्म्यं वर्षकोटिशतैरपि ।
अशक्यं विस्तराद्वक्तुं तस्मात्संक्षेपतः शृणु ॥
वेदे शिवागमे चायमुभयत्र षडक्षरः ।
मन्त्रः स्थितः सदा मुख्यो लोके पञ्चाक्षरः स्मृतः ।
सर्वमन्त्राधिकश्चायमोंकाराद्यः षडक्षरः ।
सर्वेषां शिवभक्तानामशेषार्थप्रसाधकः ।
तदल्पाक्षरमन्त्राढ्यं वेदसारं विमुक्तिदम् ।
आज्ञासिद्धमसन्दिग्धं वाक्यमेतच्छिवात्मकम् ।
नानासिद्धियुतं दिव्यं लोकचित्तानुरञ्जकम् ।
सुनिश्चितार्थगम्भीरं वाक्यं तत्पारमेश्वरम् ।
मन्त्र सुखमुखोच्चार्यमशेषार्थ प्रसिद्धये ।
प्राहों नमः शिवायेति सर्वज्ञः सर्वदेहिनाम् ।
तद्बीजं सर्वविद्यानां मन्त्रमाद्यं षडक्षरम् ।
एतावत्तु शिवज्ञानमेतावत्परमं पदम् ।
यदोंनमः शिवायेति शिव वाक्यं षडक्षरम् ॥
शिव ज्ञानानि यावन्ति विद्यास्थानानि यानि च ।
षडक्षरस्य सूत्रस्य तानि भाष्य समासतः ॥

ॐ नमो भगवते वासुदेवाय । इति मन्त्रः ।

तदनन्तर स्तोत्रम्—तस्यान्ते चेद स्तोत्रफलम् ।

एवमुक्ते शुभे वाक्ये राजा केशवमब्रवीत् ।
इदं स्तोत्रं महापुण्यं सफल कुरु केशव ॥

वासुदेव उवाच—

सत्ये युगे महाराज यदा स्तोष्यति मानवः ।
तदा मोक्ष प्रदास्यामि तत्क्षणान्नात्र संशयः ॥
त्रेतायां मासमात्रेण मासषट्केन द्वापरे ।
वर्षैकेन कलौ प्राप्ते ये जपन्ति च मानवाः ॥
स्वर्गं यास्यन्ति राजेंद्र वैष्णव गतिदायकम् ॥
त्रिकालमेककाल वा स्नातो जपति ब्राह्मण ।
य य तु वाञ्छते काम स स तस्य भविष्यति ॥
क्षत्रियो जयमाप्नोति धनधान्यैरलङ्कृत. ।
वैश्यो भविष्यति श्रीमान् शूद्रः सुखमवाप्नुयात् ॥ इति ॥

विष्णुधर्मोत्तरे च

द्वादशाक्षराष्टाक्षरमन्त्रयोः स्त्रीशूद्रयोरधिकार इति घोषितम् ।

मार्कंडेय उवाच—

तिलप्रस्थ तथा हुत्वा सोपवासो जितेन्द्रियः ।
न दुर्गतिमवाप्नोति नात्र कार्या विचारणा ॥
तद्विष्णोः परमं नित्यं सोममंत्र. प्रकीर्तित ।
पौरुषं च तथा सूक्तं श्रीसूक्तेन च संयुतम् ॥
होम. कार्योऽथ राजेन्द्र सावित्र्या परमात्मन ।

एतत्प्रोक्तं द्विजातीनां स्त्रीशूद्रेषु च यत् शृणु ।
द्वादशाष्टाक्षरौ मंत्रौ तेषां प्रोक्तौ महात्मनाम् ॥
द्वितौ तौ च द्विजातीनां मंत्रश्रेष्ठौ नराधिप ।
तेभ्योऽप्यधिकमंत्रोऽपि विद्यते नहि कुत्र चित् ॥

वज्र उवाच—

द्वादशाष्टाक्षरौ मंत्रौ कथयस्व ममानघ ।
पुण्यौ पवित्रौ माङ्गल्यौ सर्वपापप्रणाशनौ ॥

मम भक्तो जितक्रोधो ह्यलब्धो लब्ध एव वा ॥
किमत्र बहुनोक्तेन भक्ताः सर्वेऽधिकारिणः ।
मम पञ्चाक्षरे मंत्रे तस्माच्छ्रेष्ठतरो हि सः ॥
रहस्यमन्यद्वक्ष्यामि गोपनीयमिदं प्रिये ।
न वाच्यं यस्य कस्यापि नास्तिकस्याथवा पशोः ॥

सदाचार विहीनस्य पतितस्यांतजस्य च ।
पञ्चाक्षरात्परं नास्ति परित्राणं कलौ युगे ॥
अन्त्यजस्यापि मूर्खस्य मूढस्य पतितस्य च ।
निर्मर्यादस्य नीचस्य मंत्रोऽयं न च निष्फलः ॥

सर्वावस्थांगतस्यापि मयि भक्तिमत परम् ।
सिध्यत्येव न सन्देहो नापरस्य तु कस्यचित् ॥
ये दोषा सर्वमन्त्राणां न तेऽस्मिन् सम्भवन्त्यपि ।
अस्य मन्त्रस्य जात्यादीननपेक्ष्य प्रवर्तनात् ॥
तथापि नैव क्षुद्रेषु फलेषु प्रतियोगिषु ।
सहसा विनियुञ्जीत यस्मादेष महाफल ॥

उपमन्युरुवाच—

एवं साक्षान्महादेव्यै महादेवेन शूलिना ।
हिताय जगतामुक्तः पञ्चाक्षर विधि र्यथा ॥ इति ॥

अतः स्पष्टं लोके यः पञ्चाक्षरः स्मृतः स 'ॐ नमः शिवाय' इति ओङ्कार सहित षडक्षरः एव मन्त्रः । स च यथा द्विजै स्तथैव स्त्रीभिः शूद्रैः तथा अन्त्यजैश्च धारयितुं शक्यः । इति

'भवपाशनिबद्धानां देहिनां हित काम्यया ।
आहोनमः शिवायेति मंन्त्रमाद्यं शिव स्वयम् ॥'
'हिताय सर्व मर्त्यानां कलिजानां विशेषत.' ॥

तथाच

'सदाचार विहीनस्य पतितस्यांत्यजस्य च ।
पञ्चाक्षरात्परं नास्ति परित्राणं कली युगे ॥'

सहस्रानीक उवाच—

सत्यमुक्तं त्वया ब्रह्मन् वैदिकः परमो विधिः ।
विष्णोर्देवादिदेवस्य पूजनं प्रति मेऽधुना ॥
अनेन विधिना ब्रह्मन् पूज्यते मधुसूदनः ।
वेदज्ञैरेव नान्यैस्तु तस्मात्सर्वहितं वद ॥

श्री मार्कण्डेय उवाच—

अष्टाक्षरेण देवेशं नरसिंहमनामयम् ।
गन्धपुष्पादिभिर्नित्यमर्चयेदच्युतं नरः ॥
राजन्नष्टाक्षरो मंत्रः सर्वपापहरः परः ।
समस्तयज्ञफलदः सर्वशान्तिकरः शुभः ॥

ॐ नमो नारायणाय ।

गन्धपुष्पादि सकलमनेनैव निवेदयेत् ।
अनेनाभ्यर्चितो देवः प्रीतो भवति तत्क्षणात् ॥
किं तस्य बहुभिर्मंत्रैः किं तस्य बहुभिर्व्रतैः ।
ॐ नमो नारायणायेति मंत्रः सर्वार्थसाधकः ॥
इमं मंत्रं जपेद्यस्तु शुचिर्भूत्वा समाहितः ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥

नृसिंह पुराणेऽष्टादशाध्याये च—

ॐ नमो नारायणाय एष मंत्रः सर्वेषा मनुष्याणां हिताय
श्लोक इति स्पष्टमभिहितं तद्यथा—

श्रीशुक उवाच—

किं जपन्मुच्यते तात सततं विष्णुतत्परः ।
संसारदुःखात्सर्वेषां हिताय वद मे पितः ॥

व्यास उवाच—

अष्टाक्षरं प्रवक्ष्यामि मन्त्राणां मंत्रमुत्तमम् ।
यं जपन्मुच्यते मर्त्यो जन्मसंसारबन्धनात् ॥
हृत्पुण्डरीकमध्यस्थं शंखचक्र गदाधरम् ।
एकाग्रमनसा ध्यात्वा विष्णु कुर्याज्जपं द्विजः ॥
एकान्ते निर्जनस्थाने विष्णवग्रे वा जलान्तिके ।
जपेदष्टाक्षरं मंत्रं चित्ते विष्णुं निधाय वै ॥

विवर्धिकाः मोक्षदायिन्यः कतिपय कथाश्च अशेषाणां नृणां हितायात्र प्रकाश्यन्ते। अस्यांशमपि नित्यं श्रद्धया भक्त्या पठित्वा श्रुत्वा वा

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।
धर्मज्ञानप्रचारेण प्रीयतां परमेश्वरः॥

कोऽयं वै परमेश्वरः।

अस्ति किं कोऽपि ईश्वरः।

अस्त्येव। एकमेवाद्वितीयम्—इति श्रुतिः

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवत्कश्चिद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वा चैनं वेद न चैव कश्चित्॥

अहरहः सहस्ररश्मिः सूर्य उदेति। अहरहः 'हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन्।' अस्तंगते च जगत तस्थुषश्च आत्मनि भगवति मरीचिमालिनि अहरहः लोकाह्लादकरः अमृतांशुः रात्रिं ज्योतिष्मतीं कुर्वन् गगनपथमारूढः सूर्यवत् पूर्वदिशातः आकाशमार्गेण पश्चिमां दिशमुपयाति। आयातायां यामिन्यां वियत् दशदिशः प्रकाशयन्तीभिर्नक्षत्रताराग्रहाणां ज्योतिभिरनिर्वचनीयां शोभां धारयति। सर्व एव एते असंख्याताः नक्षत्रताराग्रहाः सूत्रैर्बद्धा गोलका इव अनिर्भेद्यै रलंघनीयैर्नियमैः दिनाद्दिनं मासान्मासं वर्षाद्वर्षं निर्दिष्टान्मार्गाननुसरन्तः वियति सचरन्तः दृश्यंते। अस्ति किं कोऽपि अस्य परमाश्चर्यमयगोलकमंडलस्य निर्माता नियंता च। अस्ति इति श्रुतिः।

'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवी आन्तरिक्ष मथो स्वः।'.

रचनानुपपत्तेश्च।

अत्यद्भुत मिदं प्राणात्मकं चिदात्मकं जगत्—जरायुजाः अंडजाः स्वेदजाः उद्भिज्जा. सर्व एव प्राणवन्तः। परमाश्चर्यमयी चैतेषां रचना—

'संगत्या जठरे न्यस्तं रेतो विन्दुमचेतनम्।
केन यत्नेन जीवन्तं गर्भस्थमिह पश्यसि॥'

विष्णोरष्टाक्षरमन्त्रस्तु वेदज्ञा वेदज्ञ साधारणः । तथाहि नृसिं
पुराणे षोडशाङ्गात्मक पुरुषसूक्तस्य प्रत्यृचमावाहनादि षोडशोपच
रात्मके पूजाविधावुक्ते—

अनेन विधिना देवः पूज्यते मधुसूदनः ।
वेदज्ञैरेव नान्यैस्तु तस्मात्सर्वहितं वद ॥

इति प्रश्नानन्तरमाह

अष्टाक्षरेण देवेशं नरसिंह मनामयम् ।
गन्धपुष्पादिभि र्नित्य मर्चयेदच्युतं नरः ॥

गन्धेति पूर्वोक्तसकलोपचारोपलक्षणम् ।

तथा

एकान्तविजने स्थाने विष्णवग्रे वा जलान्तिके ।
जपेदष्टाक्षरं मंत्रं चित्ते विष्णुं निधाय वै ॥
आयुष्य धनपुत्रांश्च पशून्विद्यां महद्यशः ।
धर्मार्थं काम मोक्षांश्च लभते जपकृन्नरः ।" इति

ॐ नमः शिवाय

एवं

ॐ नमः, शिवायेति मंत्र विषयेऽपि दृश्यते
तत्रादौ स्मर्तव्यं विद्वद्भिः यत् यो मन्त्रः
लोके पञ्चाक्षरः स्मृतः स षडक्षरो मन्त्रः ॥

तथाहि स्कन्दपुराणे

शैवं षडक्षरं दिव्यं मन्त्रमाहुर्महर्षयः ।
देवानां परमो देवो यथा वै त्रिपुरान्तकः ।
मन्त्राणां परमो मन्त्रस्तथा शैवः षडक्षरः ॥
एष पञ्चाक्षरो मन्त्रो जन्तूणां मुक्तिदायकः ।
संसेव्यते मुनिश्रेष्ठैरशेषैः सिद्धि कांक्षिभिः ॥
भव पाश निबद्धानां देहिनां हित काम्यया ।
आहों नमः शिवायेति मन्त्रमाद्यं शिवः स्वयम् ॥

एक एव तदा रुद्रो न द्वितीयोऽस्ति कश्चन ।
संसृज्य विश्वं भुवनं गोप्तान्ते संचुकोच सः ॥
विश्वतश्चक्षुरेवाय मुतायं विश्वतो मुखः ।
तथैव विश्वतो बाहु र्विश्वतः पाद संयुतः ॥
द्यावा भूमी च जनयन् देव एको महेश्वरः ।
स एव सर्व देवानां प्रभवश्चोद्भवस्तथा ॥
सर्वानन शिरो ग्रीवः सर्वभूत गुहाशयः ।
सर्वव्यापी च भगवां स्तस्मात् सर्वगतः शिवः ॥
सर्वेन्द्रिय गुणाभासः सर्वेन्द्रियविवर्जितः ।
सर्वस्य प्रभुरीशानः सर्वस्य शरणं सुहृत् ॥
अचक्षुरपि यः पश्यत्यकर्णोऽपि शृणोति यः ।
सर्वं वेत्ति न वेत्तास्य तमाहुः पुरुषं परम् ॥

तथाच भागवते

एकः स आत्मा पुरुषः पुराणः सत्यः स्वयञ्ज्योतिरनन्त आद्यः ।
नित्योऽक्षरोऽजस्त्र सुखो निरञ्जनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः॥

विष्णौ च

ज्ञानं विशुद्धं विमलं विशोक मशेष लोभादि निरस्त संगम् ।
एकः सदैकः परमः परेशः स वासुदेवो न यतोऽन्यदस्ति ॥

वदन्ति तत्तत्वविदः तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

एकं सत् विप्रा बहुधा वदन्ति ।
एकं सन्तं बहुधा कल्पयन्ति । इति श्रुतिः

सृष्टेः प्राक्

आसीदिदं तमोभूत मप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जन्निदम् ।
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ॥
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
सर्वभूत मयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥

किं तस्य बहुभिर्मन्त्रैः शास्त्रैर्वा बहु विस्तरे ।
यस्योंनम शिवायेति मन्त्रोऽय हृदिसस्थित ॥
तेनाधीत श्रुत तेन कृत सर्वमनुष्ठितम् ।
येनोंनम शिवायेति मन्त्राभ्यास स्थिरीकृत ॥
नमस्कारादि सयुक्त शिवायेत्यक्षरत्रयम् ।
जिह्वाग्रे वर्तते यस्य सफल तस्य जीवितम् ॥
अन्त्यजो वाऽधमो वाऽपि मूर्खोवा पण्डितोऽपि वा ।
पञ्चाक्षर जपे निष्ठो मुच्यते पापपञ्जरात् ॥
इत्युक्त परमेशेन देव्या पृष्टेन शूलिना ।
हिताय सर्व मर्त्यानां तिष्यजानां विशेषत ॥

तस्मिन्नेव शिव पार्वती संवादे महेश्वर वचनम् ।

देवी उवाच

कलौ कलुषिते काले दुर्जये दुरतिक्रमे ।
अपुण्यतमसाच्छन्ने लोके धर्मे पराङ्मुखे ॥
क्षीण वर्णसमाचारे सङ्करे समुपस्थिते ।
सर्वाधिकारे सन्दिग्धे निश्चिते वा विपर्यये ॥
तदोपदेशे विहते गुरुशिष्य क्रमे गते ।
केनोपायेन मुच्यन्ते भक्तास्तव महेश्वर ॥

महेश्वर उवाच

आश्रित्य परमां विद्यां हृद्यां पञ्चाक्षरीं मम ॥
भक्त्या च भावितात्मानो मुच्यते कलिजा नरा ।
मयेवमसकृद्देवि प्रतिज्ञात धरातले ।
पतितोऽपि विमुच्येत मद्भक्तो विद्ययाऽनया ॥
अश्रद्धो वा सश्रद्धो वा सकृत्पञ्चाक्षरेण य ।
पूजयेत्पतितो वाऽपि मूढो वा मुच्यते नर ॥
षडक्षरेण वा देवि तथा पञ्चाक्षरेण वा ।
स ब्रह्माङ्गेण मा भक्त्या पूजयेद्यदि मुच्यते ॥
पतितोऽपतितो वापि मन्त्रेणानेन पूजयेत् ।

रुद्रा बहुशिरा बभ्रु विंश्वयोनिः शुचिश्रवाः ।
आदिदेवो महादेवो देवेशो देव भृद्गुरुः ॥ इत्यादि ॥

तथा च भागवते

अदितिपयोव्रतकथायां देवस्तुतौ ।
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूत निवासाय वासुदेवाय साक्षिणे ॥
नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्व विद्याधिपतये भूतनां पतये नमः ॥

भारते

वसनात्सर्वभूतानां वसुत्वाद्देवयोनितः ।
वासुदेवस्ततो ज्ञेयो योगिभिस्तत्वदर्शिभिः ॥

विष्णुपुराणे

सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च सर्वात्मा वासुदेव स्ततो स्मृतः ॥

मनुः

आपो नारा इति प्रोक्ता आपो वै नर सूनवः ।
ता यदस्यायनं पूर्व तेन नारायण, स्मृतः ॥

भारते

नराज्जातानि तत्वानि नाराणीति ततो विदुः ।
तान्येव चायनं तस्य तेन नारायणः स्मृतः ॥

ब्रह्मवैवर्त्ते

नराणामयनं यस्मात्तस्मान्नारायणः स्मृतः ॥
अन्तर्बहिश्च जगतो धाता त्र्याता सनातनः ।
स्रष्टा नियन्ता शरणं विधाता विश्वभावनः ॥
माता पिता सखा भ्राता निवासश्च सुहृद्गतिः ।
योऽसौ श्रियः श्रीः परमस्तेन नारायणः स्मृतः ॥
नराणां सर्व जगतामयनं शरणं हरिः ।
तस्मान्नारायण इति मुनिभिः संप्रकीर्त्यते ॥ इति हारीतः ।

'अरुद्रो वा सरुद्रो वा सकृत्पञ्चाक्षरेण यः।
पूजयेत्पतितो वापि मूढो वा मुच्यते नरः।
षडक्षरेण वा देवि तथा पञ्चाक्षरेण वा॥'

भगवद्वचनादेव स्थापितम्॥

अन्येषु च पुराणेषु बहुषु स्थलेषु ओङ्कार सयुक्तानां मन्त्राणां निवेशः कृतः। पुराणान्तर्गतानां तेषामुच्चारणे जपे वा न कस्यापि दोषः इत्यर्थमेव प्रतिपादयता भगवता कुमारिलेनोक्तं तन्त्र वार्तिके—

तानेव वैदिकान् वर्णान् भारतादि निवेशितान्।

स्वाध्याय नियमं हित्वा लोकः बुद्ध्या प्रयुञ्जत इति यथा पूर्वं सूचितम्॥

अन्यच्च

श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः।
सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्॥
नृणामयं परोधर्मः सर्वेषां समुदाहृतः।
त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति॥

इति युधिष्ठिर प्रश्नोत्तरे सनातनान् धर्मान् कथयता भगवता नारदेन नवधा भक्ति साधने सर्वेषामेव नृणामधिकारो घोषितः॥

एतेषां मंत्राणां स्वरूपं तु निर्विवादम्। ॐ नमो भगवते वासुदेवाय इति द्वादशाक्षरो मन्त्रः ॐ कारसहित एव द्वादशाक्षरः, ॐ नमो नारायणाय इति अष्टाक्षरो मंत्रः ॐ कारसहित एव अष्टाक्षरः, ॐ नमः शिवाय इति शैवः षडक्षरो मन्त्रः यो हि 'लोके पंचाक्षरः स्मृतः' ॐकारसहित एव षडक्षरः॥ अपरं च यैः ग्रंथैरेतेषां मंत्राणां महिमा ख्यापितः तैरेव स्पष्टं प्रतिपादितं यदेते मन्त्रा यथा द्विजैस्तथा स्त्रीभिः शूद्रैश्च संकीर्णैश्चोपासितव्याः। अतः अस्मिन् विषये नास्त्यवसरो संशयस्य।

एषोऽर्थः पुराणान्तर्गतेषु बहुषु मन्त्रेषूदाहृतः। तेषां मध्ये द्वादशाक्षराष्टाक्षर षडक्षर-पञ्चाक्षर-त्र्यक्षर-मन्त्राः चतुर्भिरपि वर्णैः सामान्यतयोपास्याः सर्ववाञ्छोपकारकाः श्चतस्तेषां माहात्म्यं तत्तद्विषयकाः पापशोकाज्ञानहराः पुण्यप्रदाः पावनीः ज्ञान भक्ति वैराग्य

तस्यैकस्यैव तिस्रः संज्ञाः

तथा च विष्णुपुराणे

सृष्टिस्थित्यंतकरणीं ब्रह्मविष्णु शिवाभिधाम्।
स संज्ञां याति भगवानेक एव जनार्दनः॥

बृहन्नारदीयपुराणे च

वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम्।
उपेन्द्रं सान्द्रकारुण्यं परानन्दं परात्परम्॥
अन्तर्यामी जगद्व्यापी सर्व साक्षी निरञ्जनः।
भिन्नाभिन्न स्वरूपेण स्थितो वै परमेश्वरः॥

यो ब्रह्मरूपी जगतां विधाता स एव पाता द्विजविष्णुरूपी।
कल्पान्तरुद्राख्यतनुः स देवः शेतेऽब्धिपानस्तमज भजामि॥
शिवस्वरूपी शिवभक्तिभाजां यो विष्णुरूपी हरिभावितानाम्।
संकल्प पूर्वात्मकदेह हेतुस्तमेव नित्यं शरणं प्रपद्ये॥

नारायणोऽक्षरोऽनन्तः सर्वव्यापी निरञ्जनः।
तेनेदमखिलं व्याप्तं जगत्स्थावरजङ्गमम्॥
तमादिदेव मजरं केचिदाहुः शिवाभिधम्।
केचिद्विष्णु सदा सत्यं ब्रह्माणं केचिदूचिरे॥

तथा च शिवपुराणे

ज्ञान संहितायां ४ अध्याये

महेश्वर उवाच—

त्रिधा भिन्नो ह्यहं विष्णो ब्रह्मविष्णुहराख्यया।
सर्गरक्षालयगुणैर्निष्कलोऽयं सदा हरे॥
अहं भवानयं चैव रुद्रोऽयं यो भविष्यति।
एकं रूपं न भेदोऽस्ति भेदे च बंधनं भवेत्॥
तथापीह मदीयं वै शिवरूपं सनातनम्।
मूलभूतं सदा प्रोक्तं सत्यं ज्ञानमनन्तकम्॥
एवं ज्ञात्वा सदा ध्येयं तत्र जिज्ञासुना त्वया।
मद्दर्शने फलं यद्वै तदेव तव दर्शने॥

को गर्भं पालयत्येनं कश्च संवर्धयत्यपि ।
जायमाने शिशौ मातुः स्तने स्तन्यं करोति कः ॥
कया शक्तया च सृज्यन्ते प्राणिनश्च द्रुमास्तथा ।
पाल्यन्ते च कया सर्वे पानभोजनसाधनैः ॥
पिपीलिकाः कया भित्तिमधिरोहन्त्यहर्निशम् ।
निराधारं कयाऽकाशे उड्डीयन्ते पतत्रिणः ॥
नराणामथ नारीणां मनुष्याणां गवां तथा ।
सिंहानां हस्तिनाश्चैव संसृष्टिः पक्षिणां कथम् ॥
मनुष्येभ्यो मनुष्या हि सिंहाः सिंहेभ्य एव च ।
अश्वेभ्यो वाजिनः गोभ्यो गावः स्युर्लोकमातरः ॥
मयूरेभ्यो मयूरा हि हंसा हंसेभ्य एव च ।
शुकाः शुकेभ्यश्चित्रेभ्यो कपोतेभ्यः कपोतकाः ॥
बीजेभ्योऽत्यल्पकायेभ्योऽचिन्त्यशक्ति प्रवर्धिता ।
वृक्षाः शश्वत्प्रजायन्ते पत्रपुष्पफलश्रियः ॥
प्राणिनां वर्धयन् सौख्य श्वसन्ति बहुलाः समाः ।
वितरन्ति च स्वादूनि रसवन्ति फलानि च ॥
'अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति यत्र यत्र।'
अत्यद्भुतेयं रचना मनोहरा सुखप्रदा राजति तत्र तत्र ॥

यत्रेदृशी ज्ञानात्मिका सार्वत्रिका समानावयवसंस्थाना सुशोभना अनंता रचना तत्र विद्यत एव कोऽपि सत् चित् आनन्द स्वरूपः सदा सर्वत्र सर्वगः अनन्त शक्ति गुण संपन्नः रचयिता इति विवशतया बुद्धिः स्वीकरोति ।

तथाहि शिवपुराणे वा० सं० पूर्व० ४ अध्याये—

अस्तिकश्चिदपर्यन्त रमणीय गुणाश्रयः ।
पतिर्विश्वस्य निर्माता पशु पाश विमोक्षणः ॥
अभावे तस्य विश्वस्य सृष्टिरेषा कथं भवेत् ।
अचेतनत्वादज्ञानादनयोः पशु पाशयोः ॥
प्रधान परमाण्वादि यावत् किञ्चिदचेतनम् ।
न तत्कर्तृ स्वयं दृष्टं बुद्धिमत्कारणं विना ॥
जगद्य कर्तृ सापेक्षं कार्यं सावयवं यतः ।
तस्मात्कार्यस्य कर्तृत्वं पत्युर्न पशु पाशयोः ॥

महाभारते शांतिपर्वणि ३४१ अध्याये—

श्रीभगवानुवाच—

अहमात्मा हि लोकानां विश्वानां पाण्डुनन्दन।
तस्मादात्मानमेवाग्रे रुद्रं सपूजयाम्यहम्॥
यद्यहं नार्चयेऽय वै ईशानं वरदं शिवम्।
आत्मानं नार्चयेत्कश्चिदितिमेभावितात्मनः॥
मया प्रमाणं हि कृतं लोकः समनुवर्त्तते।
प्रमाणानि हि पूज्यानि ततस्तं पूजयाम्यहम्॥
यस्त वेत्ति स मां वेत्ति योऽनुत सहिमा मनु।
रुद्रो नारायणश्चैव सत्वमेकं द्विधाकृतम्॥
इति सचिंत्य मनसा पुराणं रुद्रमीश्वरम्।
पुत्रार्थमाराधितवानहमात्मानमात्मना॥
नहि विष्णु प्रणमति कस्मैचिद्विबुधाय च।
अत आत्मानमेवेति ततो रुद्रं भजाम्यहम्॥
सब्रह्मका सरुद्राश्च सेन्द्रा देवाः महर्षिभिः।
अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिम्॥

तथा हि **महाभारते** अनुशासन पर्वणि—

नमस्त्वृषिभ्यः परम परेषां देवेषु देव वरद वरेण्यम।
सहस्रशीर्षाय नमः शिवाय सहस्रनामाय जनार्दनाय॥ इति।

अतो हि—

ॐ नमो भगवते वासुदेवाय तथा ॐ नमो नारायणाय तथा ॐ नमः शिवाय इत्यादि मन्त्राणां युगपद्धारणमुदाराणां स्मार्तवैष्णव शैवशास्त्राणामनुकूलम्। अतो हि

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्य व्यवस्थितौ।
ज्ञात्वा शास्त्र विधानोक्तं कर्म कर्तुमिहार्हसि॥

इति भगवतस्त्रिभुवनगुरोरनुशासनं समुचितमानपूर्वकं मनसि निधाय सर्वभूतदयया सर्वेषामुपकारायसर्वैः धर्मोन्नतिमभीप्सद्भिः विज्ञैः शास्त्रानुकूलं मंत्राणां प्रचारः करणीयः॥

प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधी गम्यं विद्यात्तं पुरुषं परम् ॥
एतमेके वदन्त्यग्निं मनु मन्ये प्रजापतिम् ।
इन्द्रमेके परं प्राण मपरे ब्रह्म शाश्वतम् ॥ इति मनु

तथाहि विष्णुसहस्रनाम्नि युधिष्ठिरस्य प्रश्नः

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥

तस्योत्तरे भीष्म वचनम् ।

जगत्प्रभु देव देवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नाम सहस्रेण पुरुषः सततोत्थितः ॥
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायं स्तुवन्नमस्यंश्च यजमान स्तमेव च ॥
अनादि निधन विष्णु सर्वलोक महेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्य सर्वदु.खातिगो भवेत् ॥
ब्रह्मण्य सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथ महद्भूत सर्वभूतभवोद्भवम् ॥
परम यो महत्तेजः परम यो महत्तपः ।
परमं यो महद्ब्रह्म परम यः परायणम् ॥
पवित्राणां पवित्र यो मगलानाञ्च मगलम् ।
दैवतं देवतानां च भूतानां योऽव्यय. पिता ॥

तथा च विष्णुसहस्रनाम्नि स्तोत्रे—

पूतात्मा परमात्माच मुक्तानां परमा गतिः ।
अव्यय. पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥
योगो योगविदां नेता प्रधान पुरुषेश्वरः ।
नारसिंह वपु· श्रीमान् केशवः पुरुषोत्तमः ॥
सर्वः शर्वः शिव स्थाणुर्भूतादिर्निधिरव्यय. ।
स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ॥
ईशान· माधवः प्राणो ज्येष्ठ श्रेष्ठः प्रजापति. ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदन· ॥

तथा श्वेताश्वतरोपनिषदि

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥
नैव स्त्री न पुमानेष न चैवायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥

स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति ।
क्रियागुणैरात्मगुणैश्च तेषां संयोग हेतु रपरोऽपि दृष्टः ॥
अनाद्यनन्तं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥

भावग्राह्य मनीडाख्यं भावाभावकरं शिवम् ।
कला सर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥

भागवते ११ स्कंधे ३ अध्याये ।

राजोवाच—

नारायणाभिधानस्य ब्रह्मणः परमात्मनः ।
निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ॥

पिप्पलायन उवाच—

स्थित्युद्भव प्रलयहेतुरहेतुरस्य यत्स्वप्नजागर सुषुप्तिषु सद्बहिश्च ।
देहेन्द्रिया सुहृदयानि चरन्ति येन सञ्जीवितानि तदवेहि परं नरेन्द्र ।
नैतन्मनोविशतिवागुत चक्षुरात्मा प्राणेन्द्रियाणिचयथानलमर्चिषःस्वाः ।
शब्दोऽपिबोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः ॥
सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवम् ।
ज्ञान क्रियार्थ फलरूपतयोरुशक्ति ब्रह्मैवभाति सदसच्चतयोः परं यत् ॥
नात्माजजाननमरिष्यति नैधतेऽसौनक्षीयतेसवनविद्व्यभिचारिणांहि
सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेन्द्रियबलेनविकल्पितंसत् ।
अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणोहि जीव मुपधावति तत्रतत्र ।
सन्ने यदिन्द्रियगणेऽहमिच प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥
यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि ।
तस्मिन्विशुद्धउपलभ्यतआत्मतत्त्वंसाक्षाद्यथामलदृशोः सवितृप्रकाशः ।

शिवपुराणे

अनादि मल सश्लेष प्रागभाव स्वभावतः।
अत्यंतपरिशुद्धात्मे त्यतोऽयं शिव उच्यते॥
अथवाऽशेषकल्याणगुणैक घन ईश्वरः।
शिव इत्युच्यते सद्भिः शिव तत्त्वार्थ वेदिभिः॥

रामतापनीये

रमन्ते योगिनोऽनन्ते नित्यानंदे चिदात्मनि।
इति रामपदे नासौ परं ब्रह्माभिधीयते॥
रमते सर्व भूतेषु स्थावरेषु चरेषुच।
अन्तरात्म स्वरूपेण यच्च राम. प्रकीर्त्यते॥

भारते

कृष्णाय वासुदेवाय हरये परमात्मने।
प्रणतः क्लेशनाशाय गोविंदाय नमो नमः॥
सच्चिदानंद रूपाय विश्वोत्पत्त्यादिहेतवे।
तापत्रयविनाशाय श्रीकृष्णाय वय नुम॥

अतः ॐ नमो भगवते वासुदेवाय ॐ नमो नारायणाय ॐ नमः शिवाय श्रीरामाय नम श्रीकृष्णाय नमः

एते मन्त्रा· गृण त्येकमद्वितीयमज विभुम्।
विश्वोत्पत्त्यादि कर्तार सच्चिदानद रूपिणम्॥
नारायणो वासुदेव रुद्रो विष्णु· पितामह।
राम. कृष्णः शिवो ह्येकः स्तूयते बहुनामभि.॥

तथा च शिवपुराणे कैलास संहितायां ८ अध्याये—

शिवो महेश्वरस्त्रैव रुद्रो विष्णुः पितामहः।
ससार वैद्य. सर्वज्ञ. परमात्मेति मुख्यत।
नामाष्टकमिदं नित्य शिवस्य प्रतिपादकम्॥

सर्वानन शिरोग्रीवः सर्वभूत गुहाशयः ।
सर्वव्यापी स भगवान् तस्मात्सर्व गतः शिवः ॥
अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं पुराणम् ॥
अणो रणीयान्महतो महीयानात्मास्य जन्तो र्निहितं गुहायाम् ।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमा न मीशम ॥
सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
सर्वेन्द्रिय गुणाभासं सर्वेन्द्रिय विवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् ॥
सूक्ष्माति सूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टार मनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्ति मत्यन्तमेति ॥
एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये संन्निविष्टः ।
हृदा मनीषी मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥
अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
हृदा मनीषो मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥
न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा हृदिस्थं मनसा य एन मेवं विदुरमृतास्ते भवन्ति ॥
एको देव सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्ष सर्वभूताऽधिवासः साक्षी चेता केवलो निर्गुणश्च ॥
एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति ।
तमात्मस्थं येनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
नित्यो नित्यानां चेतनश्चेतनाना मेको बहूनां विदधाति कामान् ।
तत्कारणं सांख्ययोगाऽधिगम्यं ज्ञात्वादेवं मुच्यते सर्वपाशैः ॥
स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपञ्चः परिवर्ततेऽयम् ।
धर्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थममृतं विश्वधाम ॥
तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ता द्विदाम देवं भुवनेशमीड्यम् ॥
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्ति र्विविधैव श्रूयते स्वाभाविकी ज्ञान बल क्रिया च ॥
न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगम् ।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥

ममैव हृदये विष्णुः विष्णोश्च हृदये ह्यहम्।
उभयोरन्तरं यो वै न जानाति मतो मम॥

तत्रैव शिवपुराणे

ज्ञा. सं. ५ अध्याये विष्णुं प्रति

महेश्वर उवाच—

ममं ध्येय भवांश्चैव तव ध्येयमहं पुनः।
आवयोरन्तरं नैव ह्यणुमात्रं विचारतः॥
त्वाञ्च समाश्रिता ये वै मामेव समुपाश्रिताः।
अन्तरं यश्च जानाति निरये पतति ध्रुवम्॥

श्रीहरिः-उवाच—

शङ्कर श्रूयतां मत्तः, कृपासिन्धो जगत्पते।
मम ध्येयः सदा त्वञ्च भविष्यसि न चान्यथा॥
भवतः सर्वसामर्थ्यं लब्धं चैव पुरा मया।
क्षणमात्रमपि च ते ध्यानं वै परमात्मनः।
चेतसो दूरतश्चैव मा गच्छतु कदाचन॥

तथा च—

भागवते ४ स्कं. ७ अध्याये

श्रीभगवानुवाच—

अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्।
आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः॥
आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज।
सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम्॥
तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि।
ब्रह्म रुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति॥
यथा पुमान्न स्वांगेषु शिरः पाण्यादिषु क्वचित्।
पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः॥
त्रयाणामेकभावानां यो न पश्यति वै भिदाम्।
सर्वभूतात्मनां ब्रह्मन् स शान्तिमुपगच्छति॥

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवै स्तपसा कर्मणा वा।
ज्ञान प्रसादेन विशुद्ध सत्त्व स्ततस्तु तं पश्यते निष्कलं ध्यायमानः॥
एषोऽणु रात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश।
प्राणै श्चित्तंसर्वमोत प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा॥

अत्र वै याज्ञवल्क्यः—

द्वासप्तति सहस्राणि हृदयादभिनिःसृताः।
हिताऽहिता नाम नाड्यस्तासां मध्ये शशिप्रभम्।
मण्डलं तत्र मध्यस्थ आत्मादीप इवाचलः।
सज्ञेयस्तं विदित्वेह पुनराजायते न तु॥
अनन्य विषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत्प्रभुः॥

भागवते—

अथोत्तजालम्भमिहाऽशुभात्मनः शरीरिणः संसृति चक्रशातनम्।
तद्ब्रह्मनिर्वाण सुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम्॥
कोऽति प्रयासोऽसुर बालका हरे रुपासने स्वे हृदिच्छिद्रवत्सतः।
स्वस्यात्मनः सख्युरशेष देहिनां सामान्यतः किं विषयोपपादनैः॥

साकारध्यानम्

भागवते—

केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्।
चतुर्भुजं कञ्जरथाङ्गशंखं गदाधरं धारणया स्मरन्ति॥
प्रसन्न वक्त्रंनलिनायतेक्षणं कदंब किंजल्क पिशंगवाससम्।
लसन् महारत्न हिरण्मयाङ्गदं स्फुरन् महारत्न किरीट कुण्डलम्॥
अदीन लीला हसितेक्षणोल्लसद् भ्रूभङ्ग संसूचित भूर्यनुग्रहम्।
ईक्षेत चिन्तामय मेनमीश्वरं यावन्मनो धारणयावतिष्ठते॥
एकैकशोऽङ्गानिधियानुभावयेत्पादादि यावद्धसितं गदाभृतः।
जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा॥
यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः।
तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत॥
भगवान् सर्वभूतेषु लक्षितः स्वात्मनाहरिः।
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः॥

सच्चिदानंदरूपाय विश्वोत्पत्त्यादि हेतवे ।
तापत्रय विनाशाय श्रीकृष्णाय वयं नुमः ॥

किं रूपं परमात्मनः ।

तत्रभागवते—

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः स्वदृग हेतु र्व्यापको ऽसंग्यनावृतः ॥
एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रय ।
सर्वगोऽनावृतः साक्षी निरात्मात्मात्मन परः ॥

शिवपुराणे वायवीयसंहितायां पूर्वभागे ४ अध्याये

ऋषय ऊचुः—

बुद्धीन्द्रियशरीरेभ्यो व्यतिरिक्तस्य कस्यचित् ।
आत्मशब्दाभिधेयस्य वस्तुतोऽपि कुतः स्थिति. ॥

वायुरुवाच—

बुद्धीन्द्रियशरीरेभ्यो व्यतिरिक्तो विभुर्ध्रुव ।
अस्त्येव कश्चिदात्मेति हेतुस्तत्र सुदुर्गमः ॥
बुद्धीन्द्रियशरीराणां नात्मता सद्भिरिष्यते ।
स्मृते रनियतज्ञाना दयावद्देहवेदनात् ॥
अतः स्मर्त्तानुभूतानामशेषज्ञेयगोचरः ।
अन्तर्यामीति वेदेषु वेदान्तेषु च गीयते ॥
सर्वं तत्र स सर्वत्र व्याप्य तिष्ठति शाश्वत. ।
तथापि क्वापि केनापि व्यक्तमेष न दृश्यते ॥
नैवायं चक्षुषा ग्राह्यो नापरैरिन्द्रियैरपि ।
मनसैव प्रदीप्तेन महानात्माऽवसीयते ॥
न च स्त्री न पुमानेष नैव चापि नपुंसकः ।
नैवोर्द्ध्वं नापि तिर्यक् च नाधस्तात्र कुतश्चन ॥
अशरीरं शरीरेषु चलेषु स्थाणुमव्ययम् ।
सदा पश्यति तं धीरो नरः प्रत्यवमर्शनात् ॥

नारद उवाच—

धर्ममूलं हि भगवान् सर्ववेदमयो हरिः।
स्मृतं च तद्विदां राजन् येन चात्मा प्रसीदति॥
सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम्॥
सन्तोषः समदृक् सेवा ग्राम्येहोपरमः शनैः।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्॥
अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः।
सेवेज्यावनतिर्दास्यं सख्यमात्म समर्पणम्॥
नृणामयं परोधर्मः सर्वेषां समुदाहृतः।
त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति॥

अतश्च गीतायां—

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः॥
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥

तथा च भागवते—

नाति प्रसीदति तथोपकृतोपचारैराराधितः सुरगणै हृदियद्धकामैः।
यत्सर्वभूतदययाऽसदलभ्ययैको नानाजनेष्ववहितः सुहृदन्तरात्मा॥

अतएव महर्षेर्व्यासस्य प्रार्थना

सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥

भगवतश्चरमोपदेशः

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि माशुचः॥

अथ कथा भागः।

पद्मपुराणे

वासुदेवाभिधान स्तोत्रम्

द्वादशाक्षरो मंत्रः सर्वैर्वर्णैर्जपनीयः।

सुबाहुरुवाच—

वासुदेवाभिधानं यत्पूर्वमुक्तं हि ब्राह्मणैः।
श्रोष्याम्यहं यदा भद्र गतिं स्वां प्राप्नुयां तदा॥
पुण्यात्मना भाषित वै मुनिना संयतात्मना॥
तदाहं पातकान्मुक्तो भविष्यामि न संशयः।

विज्वल उवाच—

तवार्थं पृच्छितस्तातस्तेन मे कथित च यत्।
तत्तेऽद्याहं प्रवक्ष्यामि शाश्वतं शृणु सत्तम॥

ॐ अस्य श्रीवासुदेवाभिधानस्तोत्रस्यानुष्टुप्छन्दः नारद ऋषिः
ओङ्कारो देवता सर्वपातकनाशाय चतुर्वर्गसाधनार्थे च विनियोगः॥

ॐ नमो भगवते वासुदेवाय इति मंत्रः।

परमं पावनं पुण्य वेदज्ञ वेदमन्दिरम्।
विद्याधार मखाधारं प्रणवं तं नमाम्यहम्॥
निराबासं निराकार सुप्रकाश महोदयम्।
निर्गुण गुणकर्त्तार नमामि प्रणवं परम॥
गायत्री साम गायन्तं गीतज्ञं गीतसुप्रियम्।
गन्धर्व गीत भोक्तार प्रणव तं नमाम्यहम्॥
महाकान्तं महोत्साह महामोहविनाशनम्।
अचिन्वन्त जगत्सर्वं गुणातीत नमाम्यहम॥
भाति सर्वत्र यो भूत्वा भूतानां भूतिवर्द्धनः।
समभागाय सद्धर्मं नमामि प्रणव परम्॥
विचार वेदरूप तं यज्ञाख्य यज्ञवल्लभम्।
योनि सर्वस्य लोकस्य ओङ्कारं प्रणमाम्यहम्॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्त मनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥

बृहदारण्यके।

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषो-ऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः।

अयमात्मा सर्वेषां भूतानां मध्वस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्॥

छान्दोग्ये।

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एव आत्मनः समर्पिताः॥

य आत्मापहतपाप्मा विजरो विमृत्यु र्विशोको विजिघत्सो-ऽपिपासः सत्यकामः सत्य सङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्त मात्मान मनुविद्य विजनाति इति।

तैत्तरीये।

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नय पुरुषो मनोमयः। अमृतो हिरण्मयः॥

मुण्डकोपनिषत्।

'प्राणो ह्येष यः सर्वभूतै र्विभाति विजानन्विद्वान्भवते नातिवादी।
आत्मक्रीड आत्मरतिः क्रियावा नेष ब्रह्मविदां वरिष्ठः॥
सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम्।
अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः॥
सत्यमेव जयते नाऽनृतं सत्येन पथा विततो देवयान।
येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परम निधानम्॥
बृहच्च तद्दिव्यमचिन्त्य रूपं सूक्ष्माच्च तत्सूक्ष्मतर विभाति।
दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहित गुहायाम्॥

तेजः स्वरूपेण बिभर्ति लोकान्सर्वान्समस्तान्सचराचरस्य ।
निष्केवलो ज्ञानमयः सुशुद्धस्तं वासुदेवं शरणं प्रपद्ये ॥
दैत्यान्तकं दुःखविनाशमूलं शान्तं परं शक्तिमयं विशालम् ।
संप्राप्य देवा विलयं प्रयान्ति तं वासुदेवं शरणं प्रपद्ये ॥
सुखं सुखान्तं सुहृदं सुरेशं ज्ञानार्णवं तं सुहितं हितं च ।
सत्याश्रयं सत्यगुणोपविष्टं तं वासुदेवं शरणं प्रपद्ये ॥
यज्ञस्वरूपं पुरुषार्थरूपं सत्यान्वितं मापतिमेव पुण्यम् ।
विज्ञानमेत जगतां निवासं त वासुदेवं शरणं प्रपद्ये ॥
अम्भोधिमध्ये शयनं हि यस्य नागाङ्गभोगे शयने विशाले ।
श्रीः पादपद्मद्वयमेव सेवते त वासुदेवं शरणं प्रपद्ये ॥
पुण्यान्वित शङ्करमेव नित्यं तीर्थैरनेकैः परिसेव्यमानम् ।
तत्पादपद्मद्वयमेव तस्य श्रीवासुदेवस्य नमामि नित्यम् ॥
देवैः सुसिद्धैर्मुनिभिः सदैव नुतं सुभक्त्या उरगाधिपैश्च ।
तत्पादपङ्केरुहमेव पुण्यं श्रीवासुदेवस्य नमामि नित्यम् ॥
यस्यापि पादाम्भसि मज्जमानाः पूता दिवं यान्ति विकल्मषास्ते ।
मोक्ष लभन्ते मुनयः सुतुष्टास्त वासुदेवं शरणं प्रपद्ये ॥
पादोदकं तिष्ठति यत्र विष्णोर्गङ्गादितीर्थानि सदैव तत्र ।
त्यजन्ति प्राणांश्च अपापदेहाः प्रयान्ति शुद्धाः सुगृहं मुरारेः ॥
पादोदकेनाप्यभिषिच्यमाना अत्युग्रपापैः परिलिप्तदेहाः ।
ते यान्ति मुक्तिं परमेश्वरस्य तस्यैव पादौ सततं नमामि ॥
नैवेद्यमात्रेण सुभक्षितेन सुचक्रिणस्तस्य महात्मनश्च ।
ते वाजपेयस्य फलं लभंते सर्वार्थयुक्ताश्च नरा भवन्ति ॥
नारायणं दुःखविनाशन तं मायाविहीनं सकलं गुणज्ञम् ।
यं ध्यायमानाः सुगतिं व्रजन्ति तं वासुदेवं सततं नमामि ॥

यो वन्द्यस्त्वृषिसिद्धचारणगणैर्देवैः सदा पूज्यते ।
यो विश्वस्य हि सृष्टिहेतुकरणे ब्रह्मादिकानां प्रभुः ।
यः संसारमहार्णवे निपतितस्योद्धारको वत्सल-
स्तस्यैवापि नमाम्यहं सुचरणौ भक्त्या वरौ साधकौ ॥

यो दृष्टो निजमण्डपे सुरगणैः श्रीवामनः सामगः
सामोद्गीतकुतूहलः सुरगणैस्त्रैलोक्य एकः प्रभुः ।
कुर्वंस्तु ध्वनितैः स्वकैर्गतभयान्यः पापभीतान् रणे
तस्याहं चरणारविन्द युगलं वन्दे पर पावनम् ॥

तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम ॥
तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् ।
पूजयध्वं गृणन्तश्चध्यायन्त श्चासकृद्धरिम् ॥

तथा च गीतायाम्—

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्यधिष्ठितम् ॥

सनातन धर्म मूलम्

भगवान् वासुदेवो हि सर्वभूतेष्ववस्थितः ।
एतज्ज्ञानं हि सर्वस्य मूलं धर्मस्य शाश्वतम् ॥

अतो हि महर्षिणा व्यासेनोक्तम्—

श्रूयतां धर्म सर्वस्वं श्रुत्वा चाप्यवधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
यदन्यैर्विहितं नेच्छेदात्मनः कर्म पूरुषः ।
न तत्परेषु कुर्वीत जानन्नप्रियमात्मनः ॥
जीवितुं यः स्वयं चेच्छेत्कथं सोऽन्यं प्रघातयेत् ।
यद्यदात्मनि चेच्छेत तत्परस्यापि चिन्तयेत् ॥

पुनरेव भारते—

एष धर्मो महायोगो दानं भूतदया तथा ।
ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा ।
सनातनस्य धर्मस्य मूलमेतत्सनातनम् ॥

तथा श्रीमद्भागवते ७ स्कन्धे ११ अध्याये

सनातनधर्म निरूपणम्

युधिष्ठिर-उवाच ।

भगवन् श्रोतुमिच्छामि नृणां धर्मं सनातनम् ।
वर्णाश्रमाचारयुतं यत्पुमान् विन्दते परम् ॥

वासुदेव उवाच—

सत्ये युगे महाराज यदास्तोष्यति मानवः ।
तदा मोक्षं प्रदास्यामि तत्क्षणान्नात्र संशयः ॥
त्रेतायां मासमात्रेण मासषट्केन द्वापरे ।
वर्षैकेण कलौ प्राप्ते ये जपन्ति च मानवाः ॥
स्वर्गं यास्यन्ति राजेन्द्र वैष्णवं गतिदायकम् ।
त्रिकालमेककालं वा स्नातो जपति ब्राह्मणः ॥
यं यं तु वाञ्छते कामं स स तस्य भविष्यति ।
क्षत्रियो जयमाप्नोति धनधान्यैरलंकृतः ॥
वैश्यो भविष्यति श्रीमान् शूद्रः सुखमवाप्नुयात् ।
अथ यः श्रावयेत्स्तोत्रं पापान्मुक्तो भविष्यति ॥
श्रावको नरकं घोरं कदाचिन्नैव पश्यति ।
मम स्तोत्र प्रसादाच्च सर्वसिद्धो भविष्यति ॥
विषमे दुर्गसंस्थाने सिंहव्याघ्रभयेषु च ।
चौराणां संकटे प्राप्ते तत्र स्तोत्रमुदीरयेत् ॥
तत्राभयं महाराज स्तोत्रपाठाद् भविष्यति ।
अशेषेष्वेव दुर्गेषु राजद्वारे गते नरे ॥
कलौ युगेऽपि संप्राप्ते स्तोत्रे दास्यं प्रयास्यति ।
वेदभङ्गप्रसङ्गेन यस्य कस्य न दीयते ॥
पुण्यो धन्यः स वै दाता पुत्रवान् हि भविष्यति ।
मम स्तोत्रं पठेद्यस्तु नात्र कार्या विचारणा ॥

इति श्रीमहापुराणे पाद्मे भूमिखंडे नवनवतितमोऽध्यायः ॥

द्वादशाक्षरमंत्रयोर्महिमा

श्रीमद्भागवते-नारायणकवचे

राजोवाच—

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥

प्रतिज्ञा च

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रति जानीहि न मे भक्तः प्रणश्यति॥
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यस्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥

इति भगवदुपदेशः सर्वेषु देशेषु प्रचारणीयः भगवतः
प्रतिज्ञा च घोषणीया।

अनुकूलं चास्य प्रयत्नस्यैष समयः।

तद्यथा पद्मपुराणे भक्तिं प्रति नारदवचनम्—

कलिना सदृशः कोऽपि युगो नास्ति वरानने।
तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने॥
अन्य धर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान्।
तदा नाहं हरेर्दासो यदि त्वां न प्रवर्तये॥
त्वदन्विताश्च ये जीवा भविष्यन्ति कलाविह।
पापिनोऽपि गमिष्यन्ति निर्भयं कृष्ण मन्दिरम्॥

अतः अखिलेषु नरेषु नारीषु च शिक्षा सर्वार्थ साधिका भग-
वद्भक्तिरुत्पादनीया संवर्धनीया च। लोकद्वयसाधकः धर्मार्थदः पापनुद्
अभ्युदय निःश्रेयसकरः सनातनो धर्मः सिद्ध्यसिद्ध्योर्निर्विकारैः
मुक्तसङ्गैरनहंवादिभिः धृत्युत्साहसमन्वितैः सर्वैरपि धर्मचारिभिः
ज्ञानिभिश्च प्रचारणीयः। सर्वैरपि सनातनस्य धर्मस्य परिज्ञाने
आचरणे प्रचारे च अहरहः यत्नः करणीयः। अनया रीत्या च
सर्वभूताऽधिवासः सर्वेषां स्रष्टा सर्वेषां पिता सर्वेषां शरण्यं सर्वेषां
सुहृद् परमात्मा परितोषणीयः॥

इतीयं व्यासशिष्यस्य भारद्वाजस्य प्रार्थना।
पादयोरर्पिता श्यामः भूपालोपयशंकरी॥

श्रीकृष्णार्पणमस्तु॥

धन्वन्तरिर्भगवान्पात्वपथ्याद् द्वन्द्वाद्भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादुयताज्जनान्ताद्बलो गणात्क्रोधवशादहीन्द्रः ॥१८॥
द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखण्ड गणात्प्रमादात् ।
कल्किः कले कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥१९॥
मां केशवो गदया प्रातरव्याद्गोविन्द आसंगवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररीन्द्र पाणिः ॥२०॥
देवोऽपराह्णे मधुहोग्रधन्वा साय त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥२१॥
श्रीवत्सधामापररात्र ईश· प्रत्यूष ईशोऽसिधरोजनार्दन· ।
दामोदरोऽव्यादनुसन्ध्य प्रभाते विश्वेश्वरो भगवान् कालमूर्त्तिः ॥२२॥
चक्र युगान्ताऽनलतिग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्ष यथा वातसखो हुताशः ॥२३॥
गदेऽशनिस्पर्शन विस्फुलिङ्गे निष्पिढि निष्पिण्ढ्यजितप्रियासि ।
कूष्माण्ड वैनायक यक्षरक्षो भूतग्रहांश्चूर्णय चूर्णयारीन् ॥२४॥
त्वं यातुधान प्रमथप्रेतमातृ पिशाच विप्रग्रह घोर दृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥२५॥
त्वं तिग्मधारासि वरारिसैन्यमीशप्रयुक्ता मम छिन्धि छिन्धि ।
चक्षूंपि चर्मन् शतचन्द्र छादय द्विपामघोनां हर पापचक्षुषाम् ॥२६॥

यन्नो भय ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽहोभ्य एव वा ॥२७॥
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ।
प्रयान्तु संक्षयं सद्यो ये न. श्रेय. प्रतीपकाः ॥२८॥
गरुडो भगवान् स्तोत्रस्तोभः छन्दोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥२९॥
सर्वापद्भ्योहरेर्नामरूपयानाऽयुधानि नः ।
बुद्धीन्द्रियमनः प्राणान् पान्तु पार्षद भूषणा· ॥३०॥
यथा हि भगवानेव वस्तुत सदसच्च यत् ।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥३१॥
यथैकात्म्यानुभावनां विकल्प रहितः स्वयम् ।
भूषणायुध लिङ्गाख्या धत्ते शक्तीः स्वमायया ॥३२॥
तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वग ॥३३॥

तारकं सर्वलोकानां नौरूपेण विराजितम् ।
संसारार्णवमग्नानां नमामि प्रणवं हरिम् ॥
वसते सर्वभूतेषु एकरूपेण नैकधा ।
धामकैवल्यरूपेण नमामि वरदं सुखम् ॥
सूक्ष्मं सूक्ष्मतरं शुद्धं निर्गुणं गुणनायकम् ।
वर्जितं प्राकृतैर्भावैर्वेदाख्यं तं नमाम्यहम् ॥
देवदैत्यवियोगैश्च वर्जितं तुष्टिभिस्तथा ।
वेदैश्च योगिभिर्ध्येयं तमोंकारं नमाम्यहम् ॥
व्यापकं विश्ववेत्तारं विज्ञानं परमं पदम् ।
शिवं शिवगुणं शान्तं वन्दे प्रणवमीश्वरम् ॥
यस्य मायां प्रविष्टास्तु ब्रह्माद्याश्च सुरासुराः ।
न विन्दन्ति परं शुद्धं मोक्षद्वारं नमाम्यहम् ॥

आनन्दकन्दाय च केवलाय शुद्धाय हंसाय परावराय ।
नमोऽस्तु तस्मै गुणनायकाय श्रीवासुदेवाय महाप्रभाय ॥
श्री पाञ्चजन्येन विराजमान रविप्रभेणापि सुदर्शनेन ।
गदाख्यकेनापि विशोभमान विष्णु सदैवं शरणं प्रपद्ये ॥
यं वेदकोशं सुगुणं गुणानामाधारभूतं सचराचरस्य ।
यं सूर्यवैश्वानर तुल्यतेजसं तं वासुदेवं शरणं प्रपद्ये ॥
तमोघनानां निकरैः प्रकाश करोति नित्यं यति धर्महेतुम् ।
उद्योतमानं रवितेजसोद्ध्वं तं वासुदेवं शरणं प्रपद्ये ॥
सुधानिधानं विमलांशुरूपमानन्दमानेन विराजमानम् ।
यं प्राप्य जीवन्ति सुरादिलोकास्तं वासुदेवं शरणं प्रपद्ये ॥
यो भाति सर्वत्र रविप्रभावैः करोति शोषं च रसं ददाति ।
यः प्राणिनामन्तरगः सवायुस्तं वासुदेवं शरणं प्रपद्ये ॥
ज्येष्ठस्तु रूपेण स देवदेवो बिभर्ति लोकान्सकलान्महात्मा ।
एकार्णवे नौरिव वर्तते यस्तं वासुदेवं शरणं प्रपद्ये ॥
अन्तर्गतो लोकमयः सदैव भवप्रसो ब्याघ्रजहनानाम् ।
व्याहासुतो देवसुतस्य हेतुस्तं वासुदेवं शरणं प्रपद्ये ॥
रवैः सुपुण्यैः सकलैस्तु पुरः स सौम्यरूपैर्गुणविग्रहैश्च ।
रसाधियो निर्मलतप्रमेयः तं वासुदेवं शरणं प्रपद्ये ॥
यस्सर्वव्याप्त विनाशहेतुः सर्वाश्रयः सर्वमयः स सर्वः ।
विना दयोर्देवियदाग्रपुत्रे तं वासुदेवं शरणं प्रपद्ये ॥

आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम् ।
आशु तुष्यति मे देवः सीदन्त्याः सह पुत्रकैः ॥२३॥

कश्यप उवाच—

एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥२४॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।
अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः ॥२५॥
सिनीवाल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया ।
यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत् ॥२६॥
त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ।
उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥२७॥
निर्वर्तितात्मनियमो देवमर्चेत्समाहितः ।
अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ॥२८॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥२९॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥३०॥
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥३१॥
नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्वविद्याधिपतये भूतानां पतये नमः ॥३२॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥३३॥
नमस्ते आदिदेवाय साक्षिभूताय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ॥३४
नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥३५॥
त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ ।
अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥३६॥
अन्ववर्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः ।
स्पृहयन्त इवामोदं भगवान् मे प्रसीदताम् ॥३७॥

राजन्तं निजमण्डले मखमुखे ब्रह्मश्रिया पूजितं
दिव्येनापि स्वतेजसा करमयं ये चन्द्रनीलोपमम् ।
देवानां हितकाम्यया सुतनुजं वैरोचनस्यार्भकं
दासत्वं मम दीयतां सुरपते वन्दे परं वामनम् ॥
तं दृष्ट रविमण्डले मुनिगणैः संप्राप्तवन्तं दिवं
चन्द्रार्कौ तु तपन्तमेवसहसा संप्राप्तवन्तौ सदा ।
तस्यैवापि सुचक्रिणः सुरगणाः प्रापुर्लयं साम्प्रतं
काये विश्वविकोशके तमतुल नौमि प्रभु विक्रमम् ॥
इति श्रीमहापुराणे पाद्मे गुरुतीर्थे ऽष्टनवतितमोऽध्यायः ॥

विष्णुरुवाच—

स्तोत्रं पवित्रं परमं पुराणं पापापहं पुण्यमय शिवं च ।
धन्यं सुसूक्तं परमं सुजाप्य निशम्य राजन् स सुखी बभूव ॥
गता सुतृष्णा क्षुधया समेता देवोपमो भूमिपतिर्बभूव ।
भार्या च राज्ञः सुभगा बभूव जातावुभौ पापविमुक्त देहौ ॥
हरिस्तु देवः प्रभुराविरासीद् विप्रैः सुपुण्यैर्हरिभक्तियुक्तैः ।
आगम्य भूपं गतकल्मषं तं श्रीशंखचक्राब्जगदासिधर्ता ॥

हरिरुवाच—

वासुदेवाभिधान यन्महापातकनाशनम् ।
भवता विज्वलात्पुण्याच्छ्रुतं राजन्विकल्मषम् ॥
तेन त्वं मुक्तिभागी च सजातो नात्र संशयः ।
मम लोके प्रभुंक्ष्व त्वं दिव्यान्भोगान्मनोऽनुगान् ॥
× × × ×

सुबाहुरुवाच—

यदि देव वरो देयो मह्यं दीनाय वै त्वया ।
विज्वलाय प्रयच्छ त्वं प्रथमं वर मुत्तमम् ॥

हरिरुवाच—

विज्वलस्य पिता पुण्यः कुञ्जलो ज्ञान पण्डितः ।
वासुदेव महास्तोत्रं नित्यं जपति भूपते ॥
पुत्रैश्च प्रियया चैव समेतो मां प्रपश्यति ।
यश्चैवं जपति स्तोत्रं तस्य दास्ये महत्फलम् ॥
एवमुक्ते शुभे वाक्ये राजा वैष्णवमव्ययम् ।
इदं स्तोत्र महापुण्यं मयप्तं कुरु वैष्णव ॥

आचार्यं ज्ञानसंपन्नं वस्त्राभरण हेतुभिः ।
तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ॥५३॥
भोजयेत्ताःगुणवता सदन्नेन शुचिस्मिते ।
अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ॥५४॥
दक्षिणां गुरवेदद्यादृत्विग्भ्यश्च यथार्हतः ।
अन्नाद्येनाश्वपाकांश्च प्रीणयेत्समुपागतान् ॥५५॥
भुक्तवत्सु च सर्वेषु दीनान्धकृपणेषु च ।
विष्णोस्तत्प्रीणनं विद्वान् भुञ्जीत सहबन्धुभिः ॥५६॥
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ।
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ॥५७॥
एतत्पयोव्रतं नाम पुरुषाराधनं परम् ।
पितामहेनाभिहितं मया ते समुदाहृतम् ॥५८॥
त्वं चानेन महाभागे सम्यक् चीर्णेन केशवम् ।
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ॥५९॥
अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् ।
तपः सारमिदं भद्रे दानं चेश्वरतर्पणम् ॥६०॥
त एव नियमाः साक्षात्त एव च यमोत्तमाः ।
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोऽक्षजः ॥६१॥
तस्मादेतद् व्रतं भद्रे प्रयता श्रद्धया चर ।
भगवान्परितुष्टस्ते वरानाशु विधास्यति ॥६२॥

इति श्रीम० भा० अष्टमस्कन्धेऽदितिपयोव्रतंनाम १६—अ० ॥

द्वादशाष्टाक्षर
मंत्रौ सर्वैरेव जपनीयौ इति

विष्णुधर्मेतिलद्वादशीव्रत माहात्म्ये ।

वज्रउवाच—

एकामुपोष्य कृष्णां यां द्वादशीं विधिना नरः ।
महाफलमवाप्नोति तन्ममाचक्ष्व भार्गव ॥

मार्कण्डेय उवाच—

माघ्यां तु समतीतायां श्रवणेन तु संयुता ।
द्वादशी या भवेत् कृष्णा प्रोक्ता सा तिलद्वादशी ॥

श्रीशुक उवाच—

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच—

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्ग करन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ ४ ॥
नारायणमयं वर्म संनह्येद् भय आगते ।
पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ५ ॥
मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ।
ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ ६ ॥
करन्यास ततः कुर्याद् द्वादशाक्षरविद्यया ।
प्रणवादि यकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥ ७ ॥
न्यसेद्धृदय ओङ्कारं विकारमनु मूर्द्धनि ।
षकारन्तु भ्रुवोर्मध्ये णकारं शिखयादिशेत् ॥ ८ ॥
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद्बुधः ॥ ९ ॥
सविसर्गं फडन्तं तत्सर्व दिक्षु विनिर्दिशेत् ।
ॐ विष्णवे नम इति ॥१०॥
आत्मानं परम ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् ।
विद्या तेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥११॥

ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रि पद्मः पतगेन्द्र पृष्ठे ।
दरारि चर्मासि गदेषु चाप पाशान्दधानोऽष्ट गुणोऽष्टबाहुः ॥१२॥
जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यः वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥१३॥
दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान् नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतँश्च गर्भाः ॥१४॥
रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥१५॥
मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्म बन्धात् ॥१६॥
सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात्कूर्मो हरिर्मां निरयादशेषात् ॥१७॥

पुर विलिख्य भो विप्रास्तीरे तस्य महोदधे ।
मध्ये तत्र लिखेत्पद्ममष्टपत्र सकर्णिकम् ।२॥
एत्र मण्डलमालिख्य पूजयेत्तत्र भो द्विजा ।
अष्टाक्षर विधानेन नारायणमज विभुम् ॥३॥
अत पर प्रवक्ष्यामि कायशोधनमुत्तमम् ।
अकार हृदये ध्यात्वा चक्ररेखासमन्वितम् ॥४॥
ज्वलन्त त्रिशिख चैव दहन्त पापनाशनम् ।
चन्द्रमण्डलमध्यस्थ राकार मूर्ध्नि चिन्तयेत् ॥५॥
शुक्लवर्ण प्रवर्षन्तममृत स्रावयन्महीम् ।
एव निर्धूतपापस्तु दिव्यदेहस्ततो भवेत् ॥६॥
अष्टाक्षर ततो मन्त्र न्यसेदेवाऽऽत्मनो बुध ।
वामपाद समारभ्य क्रमशश्चैव विन्यसेत् ॥७॥
पश्चाङ्ग वैष्णव चैव चतुर्व्यूह तथैव च ।
करशुद्धि प्रकुर्वीत मूलमन्त्रेण साधक ॥८॥
एकैक चैव वर्ण तु अङ्गुलीषु पृथक्पृथक् ।
ओंकार पृथिवी शुक्ला वामपादे तु विन्यसेत् ॥९॥
नकार शाम्भव श्यामो दक्षिणे तु व्यवस्थित ।
मोकार कालमेवाऽऽहुर्वामकट्या निधापयेत् ॥१०॥
नाकार सर्वबीज तु दक्षिणस्या व्यवस्थित ।
राकारस्तेज इत्याहुर्नाभिदेशे व्यवस्थित ॥११॥
वायव्योऽय यकारस्तु वामस्कन्धे समाश्रित ।
णाकार सर्वगो ज्ञेयो दक्षिणाशे व्यवस्थित ॥१२॥
यकाराऽय शिरस्यश्च यत्र लोका प्रतिष्ठिता ।

ॐ विष्णवेनम शिर । ॐ ज्वलनाय नम शिखा । ॐ विष्णवेनम कवचम् । ॐ विष्णवे नम स्फुरण दिशोच धाय । ॐ हुफट् अस्त्रम् । ॐ शिरसि शुक्लो वासुदेव इति । ॐ आ ललाटे रक्त सकर्षणो गदात्मा वह्निस्तेज आदिस्तेज आदित्य इति । ॐ आ ग्रीवाया पीत प्रद्युम्नो वायुमेघ इति ॥ॐ आ हृदये कृष्णोऽनिरुद्ध सर्वशक्तिसमन्वित इति । एव चतुर्व्यूहमात्मान कृत्वा तत कर्म समाचरेत् ॥१३॥

ममाग्रेऽवस्थितो विष्णु पृष्ठतश्चापि केशव ।
गोविन्दो दक्षिणे पार्श्वे वामे तु मधुसूदन ॥१४॥

विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंहः ।
प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्त समस्ततेजाः ॥३४॥
मघवन्निदमाख्यातं वर्म नारायणात्मकम् ।
विजेष्यस्यञ्जसा येन दंशितोऽसुर यूथपान् ॥३५॥
एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥३६॥
न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥३७॥
इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः ।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥३८॥
तस्योपरि विमानेन गन्धर्वपतिरेकदा ।
ययौ चित्ररथस्त्रीभिर्वृतो यत्र द्विजक्षयः ॥३९॥
गगनान्न्यपतत्सद्यः सविमानो ह्यवाक् शिराः ।
स वालखिल्य वचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राची सरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥४०॥

श्रीशुक उवाच—
य इदं शृणुयात्काले यो धारयति चादृतः ।
तन्नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥४१॥
एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥४२॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे नारायण वर्म कथनं नामाऽष्टमोऽध्यायः ॥

तत्रैव अदितिपयोव्रत कथायाश्च ।

कश्यपउवाच—
उपतिष्ठस्व पुरुषं भगवन्तं जनार्दनम् ।
सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ॥२०॥
स विधास्यति ते कामान्हरिर्दीनानुकम्पनः ।
अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ॥२१॥

अदितिरुवाच—
केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिम् ।
यथा मे सत्यसंकल्पो विदध्यात्स मनोरथम् ॥२२॥

मधुपर्कमन्त्रः—

मधुपर्कं महादेव ब्रह्माद्यैः कल्पितं तव । मया निवेदितं भक्त्या गृहाण पुरुषोत्तम । ओं नमो नारायणाय नमः ॥२८॥

आचमनीय मन्त्रः—

मन्दाकिन्याः सितं वारि सर्वपापहरं शिवम् । गृहाणाऽचमनीयं त्वं मया भक्त्या निवेदितम् । ओं नमो नारायणाय नमः ॥२९॥

स्नानमन्त्रः—

त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेवच । लोकेश वृत्तिमात्रेण वारिणा स्नापयाम्यहम् । ओं नमो नारायणाय नमः ॥३०॥

वस्त्रमन्त्रः—

देवतत्वसमायुक्त यज्ञवर्णसमन्वित । स्वर्णवर्णप्रभे देव वाससी तव केशव । ओं नमो नारायणाय नमः ॥३१॥

विलेपनमन्त्रः—

शरीरं ते न जानामि चेष्टां चैव च केशव । मया निवेदितो गन्धः प्रतिगृह्य विलिप्यताम् । ओं नमो नारायणाय नमः ॥३२॥

उपवीतमन्त्रः—

ऋग्यजुः साममन्त्रेण त्रिवृत पद्मयोनिना । सावित्रीग्रन्थिसंयुक्तमुपवीतं तवार्पये । ओं नमो नारायणाय नमः ॥३३॥

अलङ्कारमन्त्रः—

दिव्यरत्नसमायुक्त वह्निभानुसमप्रभ । गात्राणि तव शोभन्तु सालंकाराणि माधव । ओं नमो नारायणाय नमः ॥

ओं नम इति प्रत्यक्षर समस्तेन मूलमन्त्रेण वा पूजयेत् ।

धूपमन्त्रः—

वनस्पतिरसो दिव्यो गन्धाढ्यः सुरभिश्च ते । मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् । ओं नमो नारायणाय नमः ॥३६॥

दीप मन्त्रः—

सूर्यचन्द्रमसो ज्योतिर्विद्युदग्न्योस्तथैव च । त्वमेव ज्योतिषां देव दीपोऽयं प्रति गृह्यताम् । ओं नमो नारायणाय नमः ॥३७॥

नैवेद्यमन्त्रः—

अन्नं चतुर्विधं चैव रसैः षड्भिः समन्वितम् । मया निवेदितं भक्त्या नैवेद्यं तव केशव । ओं नमो नारायणाय नमः ॥३८॥

एतैर्मन्त्रैर्हृषीकेशमावाहन पुरस्कृतम् ।
अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥३८॥
अर्चित्वा गन्धमाल्याद्यैः पयसा स्नपयेद्विभुम् ।
वस्त्रोपवीताभरण पाद्योपस्पर्शनैस्ततः ।
गन्ध धूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया ॥३९॥
शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ।
ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ॥४०॥
निवेदित तद् भक्ताय दद्याद् भुञ्जति वा स्वयम् ।
दत्त्वाचमनमर्चित्वा ताम्बूलं च निवेदयेत् ॥४१॥
जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ।
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ॥४२॥
कृत्वा शिरसि तच्छेषां देवमुद्वासयेत्ततः ।
द्व्यवरान् भोजयेद्विप्रान् पायसेन यथोचितम् ॥४३॥
भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ।
ब्रह्मचार्यथतद्रात्र्यां श्वो भूते प्रथमेऽहनि ॥४४॥
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ।
पयसा स्नापयित्वार्चेद्यावद्व्रत समापनम् ॥४५॥
पयोभक्षो व्रतमिदं चरेद्विष्णवर्चनादृतः ।
पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥४६॥
एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः ।
हरेराराधन होममर्हणं द्विजतर्पणम् ॥४७॥
प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ।
ब्रह्मचर्यमधः स्वप्न स्नान त्रिषवणं चरेत् ॥४८॥
वर्जयेदसदालाप भोगानुच्चावचांस्तथा ।
अहिंस्रः सर्वभूतानां वासुदेवपरायणः ४९॥
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभो. ।
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ॥५०॥
पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ।
चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥५१॥
शृतेन तेन पुरुषं यजेत सुसमाहितः ।
नैवेद्य चातिगुणवद्दद्यात्पुरुषतुष्टिदम् ॥५२॥

पद्मं शङ्खश्च श्रीवत्सो गदा गरुड एव च।
चक्रं खड्गश्च शार्ङ्गं च अष्टौ मुद्रा प्रकीर्तिताः ॥ ५५ ॥

विसर्जनमन्त्रः—

गच्छ गच्छ परं स्थानं पुराण पुरुषोत्तम।
यत्र ब्रह्मादयो देवा विदन्ति परमं पदम् ॥
अर्चनं ये न जानन्ति हरेर्मन्त्रैर्यथोदितम्।
ते तत्र मूलमन्त्रेण पूजयन्त्वच्युतं सदा ॥
ॐ नमो नारायणाय इति, अष्टाक्षरं मूलमंत्रम्।

इति एकषष्टितमोऽध्यायः ॥ ६१ ॥

अष्टाक्षर मंत्र महिमा।

नरसिंह पुराणे ६२ अध्याये

विष्णु पूजा विधि वर्णनम्

मार्कण्डेय उवाच—

वर्णानामाश्रमाणां च कथितं लक्षणं तव।
भूयः कथय राजेन्द्र शुश्रूषा तव का नृप ॥

सहस्रानीक उवाच—

स्नात्वा वेश्मनि देवेशमर्चयेदच्युतं त्विति।
त्वयोक्तं मम विप्रेन्द्र तत्कथं पूजनं भवेत् ॥
यैर्मन्त्रैरर्च्यते विष्णुः येषु स्थानेषु वै मुने।
तानि स्थानानि तन्मन्त्रं त्वमाचक्ष्व महामुने ॥

श्रीमार्कण्डेय उवाच—

अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः।
यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः ॥
अग्नौ क्रियावतां देवो हृदि देवो मनीषिणाम्।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः ॥
यश्चाग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च।
एतेषु च हरेः सम्यगर्चनं मुनिभिः स्मृतम्।
तस्य सर्वमयत्वाच्च स्थण्डिले भावितात्मनः ॥
आनुष्टुभस्य सूक्तस्य विष्णुस्तस्य च देवता।
पुरुषो यो जगद्बीजं ऋषिर्नारायणः स्मृतः ॥

तिलैः स्नानं तिलैर्होमं नैवेद्यं तिलमोदकैः ।
दीपैश्च तिलतैलेन तथा देयं तिलोदकम् ॥
तिलाश्च देया विप्रेषु तस्मिन्नहनि पार्थिव ।
उपवासदिने राजन् होतव्याश्च तथा तिलाः ॥
उपोषितेनापरेऽह्नि होतव्याश्च विशेषतः ।
इन्धनं च प्रदातव्यं ब्राह्मणेषु तथाऽनघ ॥
तिलप्रस्थं तथा हुत्वा सोपवासो जितेन्द्रियः ।
न दुर्गतिमवाप्नोति नात्र कार्या विचारणा ॥
तद्विष्णो परमन्नित्ये सोम मन्त्रः प्रकीर्त्तितः ।
पौरुषं च तथा सूक्तं श्रीसूक्तेन च संयुतम् ।
होमः कार्योऽथ राजेन्द्र सावित्र्या परमात्मनः ॥
एतत्प्रोक्तं द्विजातीनां स्त्रीशूद्रेषु च यत् शृणु ।
द्वादशाष्टाक्षरौ मन्त्रौ तेषां प्रोक्तौ महात्मनाम् ॥
हितौ तौ च द्विजातीनां मन्त्रश्रेष्ठौ नराधिप ।
तेभ्योऽप्यधिकं मन्त्रोऽपि विद्यते नहि कुत्रचित् ॥

वज्र उवाच—

द्वादशाष्टाक्षरौ मन्त्रौ कथयस्व ममानघ ।
पुण्यौ पवित्रौ माङ्गल्यौ सर्वपापप्रणाशनौ ॥

मार्कण्डेय उवाच—

ॐ नमो भगवते वासुदेवाय । ॐ नमो नारायणाय

एतौ मया व कथितौ पवित्रौ मन्त्राविमौ पापहरौ वरेण्याम् ।
परायणौ सर्व तपस्विनां यरौ वरस्यभूतौ भुवनेषु नित्यम् ॥
यथा तिथिस्ते श्रवणेन युक्ता माघस्य मासस्य तथा मयोक्ता ।
कार्या तथैव नृपतेर्विशेषाद् योगे पवित्रे सरिताहयस्य ॥

इति विष्णुधर्मोक्त तिलद्वादशी व्रतम् ।

अष्टाक्षर मंत्र महिमा

ब्रह्मपुराणे अ० ६१ विष्णु पूजन विधौ ॥

ब्रह्मोवाच—

देवान्पितॄंस्तथा चान्यान्संतर्प्याऽऽचम्य वाग्यतः ।
हस्तमात्रं चतुष्कोणं चतुर्द्वारं सुशोभनम् ॥ १ ॥

नृसिंह पुराणे ६३ अध्याये च

सहस्रानीक उवाच—

सत्यमुक्तं त्वया ब्रह्मन् वैदिकः परमो विधिः।
विष्णोर्देवादिदेवस्य पूजनं प्रति मेऽधुना॥
अनेन विधिना ब्रह्मन् पूज्यते मधुसूदनः।
वेदज्ञैरेव नान्यैस्तु तस्मात्सर्वहितं वद॥

श्रीमार्कण्डेय उवाच—

अष्टाक्षरेण देवेश नरसिंहमनामयम्।
गन्धपुष्पादिभिर्नित्यमर्चयेदच्युत नरः॥
राजन्नष्टाक्षरो मन्त्रः सर्वपापहरः परः।
समस्तयज्ञफलदः सर्वशान्तिकरः शुभः॥

ॐ नमो नारायणाय

गन्धपुष्पादि सकलमनेनैव निवेदयेत्।
अनेनाभ्यर्चितो देवः प्रीतो भवति तत्क्षणात्॥
किं तस्य बहुभिर्मन्त्रैः किं तस्य बहुभिर्व्रतैः।
ॐ नमो नारायणायेति मन्त्रः सर्वार्थ साधकः॥
इमं मन्त्रं जपेद्यस्तु शुचिर्भूत्वा समाहितः।
सर्व पापविनिर्मुक्तो विष्णु सायुज्यमाप्नुयात्॥
सर्वतीर्थफलं ह्येतत्सर्वतीर्थवर नृप।
हरेरर्चनमव्यग्र सर्वयज्ञफलं नृप॥
तस्मात्कुरु नृपश्रेष्ठ प्रतिमादिषु चार्चनम्।
दानानि विप्रमुख्येभ्यः प्रयच्छ विधिना नृप॥
एवं कृते नृपश्रेष्ठ नरसिंहप्रसादतः।
प्राप्नोति वैष्णवं तेजो यत्काङ्क्षन्ति मुमुक्षवः॥

नृसिंह पुराणे १८ अध्याये

श्रीशुक उवाच—

किं जपन् मुच्यते तात सततं विष्णु तत्परः।
संसार दुःखात्सर्वेषां हिताय वद मे पितः॥

उपरिष्टात्तु वैकुण्ठो वाराहः पृथिवीतले ।
अवान्तरदिशो यास्तु तासु सर्वासु माधवः ॥१५॥
गच्छतस्तिष्ठतो वाऽपि जाग्रतः स्वपतोऽपि वा ।
नरसिंह कृता गुप्तिर्वासुदेवमयो ह्यहम् ॥१६॥
एवं विष्णुमयो भूत्वा ततः कर्म समारभेत् ।
यथा देहे तथा देवे सर्वतत्त्वानि योजयेत् ॥१७॥
ततश्चैव प्रकुर्वीत प्रोक्षणं प्रणवेन तु ।
फट्कारान्तं समुद्दिष्टं सर्वविघ्नहरं शुभम् ॥१८॥
तत्रार्कचन्द्रवह्नीनां मण्डलानि विचिन्तयेत् ।
पद्ममध्ये न्यसेद्विष्णुं पवनस्याम्बरस्य च ॥१९॥
ततो विचिन्त्य हृदय ओकारं ज्योतिरूपिणम् ।
कर्णिकायां स्वमासीनं ज्योतीरूपं सनातनम् ॥२०॥
अष्टाक्षरं ततो मन्त्रं विन्यसेच्च यथाक्रमम् ।
तेन व्यस्तसमस्तेन पूजनं परमं स्मृतम् ॥२१॥
द्वादशाक्षर मन्त्रेण यजेद्देव सनातनम् ।
ततोऽवधार्य हृदये कर्णिकायां वह्निर्न्यसेत् ॥२२॥
चतुर्भुजं महासत्त्वं सूर्य कोटि समप्रभम् ।
चिन्तयित्वा महायोगं ज्योतीरूपं सनातनम् ॥२३॥
ततश्चाऽवाहयेन्मन्त्रं क्रमेणाऽचिन्त्य मानसे ॥

आवाहन मन्त्रः—

मीनरूपो वराहश्च नरसिंहोऽथ वामनः । आयातु देवो वरदो मम नारायणोऽग्रतः । ॐ नमो नारायणाय नमः ॥२४॥

स्थापन मन्त्रः—

कर्णिकायां सुपीठेऽत्र पद्मकल्पितमासनम् । सर्वसत्त्वहितार्थाय तिष्ठ त्वं मधुसूदन । ओं नमो नारायणाय नमः ॥२५॥

अर्घमन्त्रः—

ॐ त्रैलोक्यपतीनां पतये देवदेवाय हृषीकेशाय विष्णवे नमः । ओं नमो नारायणाय नमः ॥२५॥

पाद्यमन्त्रः—

ओं पाद्य पादयोर्देव पद्मनाभ सनातन । विष्णो कमलपत्राक्ष गृहाण मधुसूदन । ओं नमो नारायणाय नमः ॥२७॥

महापातकयुक्तोऽपि मुच्यते नात्र संशयः।
हृदि कृत्वा हरिं देवं मन्त्रमेन तु यो जपेत्॥
सर्वपापविशुद्धात्मा स गच्छेत् परमां गतिम्।
प्रथमेन तु लक्षेण आत्मशुद्धिर्भविष्यति॥
द्वितीयेन तु लक्षेण मनः शुद्धिमवाप्नुयात।
तृतीयेन तु लक्षेण स्वर्गलोकमवाप्नुयात्॥
चतुर्थेन तु लक्षेण हरेः सामीप्यमाप्नुयात्।
पञ्चमेन तु लक्षेण निर्मल ज्ञानमाप्नुयात॥
तथा षष्ठेन लक्षेण भवेद्विष्णो स्थिरा गतिः।
सप्तमेन तु लक्षेण स्वरूप प्रतिपद्यते॥
अष्टमेन तु लक्षेण निर्वाणमधिगच्छति।
स्व स्व धर्म समायुक्तो जप कुर्याद् द्विजोत्तमः॥
एतत्सिद्धिकर मन्त्रमष्टाक्षरमतन्द्रितः।
दुःस्वप्नातुरपैशाचा उरगा ब्रह्मराक्षसाः॥
जापितं नोपसर्पन्ति चौराः क्षुद्राधयस्तथा।
एकाग्रमनसाऽव्यग्रो विष्णुभक्तो दृढव्रतः॥
जपेन्नारायण मन्त्रमेव मृत्युभयाऽपहम्।
मन्त्राणां परमो मन्त्रो देवताना च दैवतम्॥
गुह्यानां परमं गुह्यमोंकाराद्यक्षराष्टकम्।
आयुष्यं धनपुत्रांश्च पशुविद्यां महद्यशः॥
धर्मार्थकाममोक्षांश्च लभते च जपन्नरः।
एतत्सत्य च धर्म्यं च वेदश्रुति निदर्शनात्॥
एतत्सिद्धि करं नृणां मन्त्ररूप न संशयः।
ऋषयः पितरो देवाः सिद्धास्त्वसुरराक्षसा.॥
एतदेव परं जप्त्वा परां सिद्धिमितो गता.।
ज्ञात्वा यस्त्वात्मन काल शास्त्रांतरविधानतः॥
अन्तकाले जपन्नेति तद्विष्णोः परमं पदम्।
नारायणाय नम इत्ययमेव सत्य।
संसार घोर विष संहरणाय मन्त्रः।
शृण्वन्तु भव्यमतयो मुदितास्त्वरागा।
उच्चैस्तरा मुपदिशाम्यहमूर्ध्वबाहुः।
भूत्वोर्ध्वबाहुरद्याह सत्यपूर्वं ब्रवीम्यहम्॥

पूर्वे दले वासुदेवं याम्ये संकर्षणं न्यसेत्।
प्रद्युम्नं पश्चिमे कुर्यादनिरुद्धं तथोत्तरे ॥ ३९ ॥
वाराहं च तथाऽऽग्नेये नरसिंहं च नैर्ऋते।
वायव्ये माधवं चैव तथैशाने त्रिविक्रमम् ॥ ४० ॥
तथाऽष्टाक्षरदेवस्य गरुडं पुरतो न्यसेत्।
वामपार्श्वे तथा चक्रं शङ्खं दक्षिणतो न्यसेत् ॥ ४१ ॥
तथा महागदां चैव न्यसेद्देवस्य दक्षिणे।
ततः शार्ङ्गं धनुर्विद्वान्न्यसेद्देवस्य वामतः ॥ ४२ ॥
दक्षिणेनेषुधी दिव्ये खड्गं वामे च विन्यसेत्।
श्रियं दक्षिणतः स्थाप्य पुष्टिमुत्तरतो न्यसेत् ॥ ४३ ॥
वनमालां च पुरतस्ततः श्रीवत्सकौस्तुभौ।
विन्यसेद्धृदयादीनि पूर्वादिषु चतुर्दिशम् ॥ ४४ ॥
ततोऽस्त्रं देवदेवस्य कोणे चैव तु विन्यसेत्।
इन्द्रमग्निं यमं चैव नैर्ऋतं वरुणं तथा ॥ ४५ ॥
वायुं धनदमीशानमनन्तं ब्रह्मणा सह।
पूजयेत्तान्निजैर्मन्त्रैरधश्चोर्ध्वं तथैव च ॥ ४६ ॥
एवं संपूज्य देवेशं मण्डलस्थं जनार्दनम्।
लभेदभिमतान्कामान्नरो नास्त्यत्र संशयः ॥ ४७ ॥
अनेनैव विधानेन मण्डलस्थं जनार्दनम्।
पूजितं यः संपश्येत स विशेद्विष्णुमव्ययम् ॥ ४८ ॥
सकृदप्यर्चितो येन विधिनाऽनेन केशवः।
जन्ममृत्युजरां तीर्त्वा स विष्णोः पदमाप्नुयात् ॥ ४९ ॥
यः स्मरेत्सततं भक्त्या नारायणमतन्द्रितः।
अन्वहं तस्य वासाय श्वेतद्वीपः प्रकल्पितः ॥ ५० ॥
ओंकारादिसमायुक्तं नमः कारान्तदीपितम्।
तन्नाम सर्वसत्वानां मन्त्र इत्यभिधीयते ॥ ५१ ॥
अनेनैव विधानेन गन्धपुष्पं निवेदयेत्।
एकैकस्य प्रकुर्वीत यथोद्दिष्टं क्रमेण तु ॥ ५२ ॥
मुद्रास्ततो निबध्नीयाद्यथोक्तक्रमचोदिताः।
जपं चैव प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥ ५३ ॥
अष्टाविंशतिमष्टौ वा शतमष्टोत्तरं तथा।
कामेषु च यथाप्रोक्तं यथाशक्ति समाहितः ॥ ५४ ॥

सर्वेषामपि पुण्यानां सर्वेषां श्रेयसामपि ।
सर्वेषामपि यज्ञानां जपयज्ञः परः स्मृतः ॥
तत्रादौ जपयज्ञस्य फलं स्वस्त्ययनं महत् ।
शैवं षडक्षरं दिव्यं मन्त्रमाहुर्महर्षयः ॥
देवानां परमो देवो यथा वै त्रिपुरान्तकः ।
मन्त्राणां परमो मन्त्रस्तथा शैवः षडक्षरः ॥
एष पञ्चाक्षरो मन्त्रो जप्तॄणां मुक्तिदायकः ।
संसेव्यते मुनिश्रेष्ठैरशेषैः सिद्धि कांक्षिभिः ॥
अस्यैवाक्षरमाहात्म्यं नालं वक्तुं चतुर्मुखः ।
श्रुतयो यत्र सिद्धान्तं गताः परमनिर्वृताः ॥
सर्वज्ञः परिपूर्णश्च सच्चिदानन्दलक्षणः ।
स शिवो यत्र रमते शैवे पञ्चाक्षरे शुभे ॥
एतेन मन्त्रराजेन सर्वोपनिषदात्मना ।
लेभिरे मुनयः सर्वे परं ब्रह्म निरामयम् ॥
नमस्कारेण जीवत्वं शिवेऽत्र परमात्मनि ।
ऐक्यं गतमतो मन्त्रः परब्रह्ममयो ह्यसौ ॥
भवपाशनिबद्धानां देहिनां हितकाम्यया ।
आहोंनमः शिवायेति मन्त्रमाद्यं शिवः स्वयम् ॥
किं तस्य बहुभिर्मन्त्रैः किं तीर्थैः किं तपोऽध्वरैः ।
यस्योंनमः शिवायेति मन्त्रो हृदयगोचरः ॥
तावद्भ्रमन्ति संसारे दारुणे दुःखसङ्कुले ।
यावन्नोच्चारयन्तीमं मन्त्रं देहभृतः सकृत् ॥
मन्त्राऽधिराजराजोऽयं सर्ववेदान्तशेखरः ।
सर्वज्ञाननिधानं च सोऽयं चैव षडक्षरः ॥
कैवल्यमार्गदीपोऽयमविद्यासिन्धुवाडवः ।
महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः ॥
तस्मात्सर्वप्रदो मन्त्रः सोऽयं पञ्चाक्षरःस्मृतः ।
स्त्रीभिः शूद्रैश्च संकीर्णैर्धार्यते मुक्तिकांक्षिभिः ॥
नास्य दीक्षा न होमश्च न संस्कारो न तर्पणम् ।
न कालो नोपदेशश्च सदा शुचिरयं मनुः ॥
महापातकविच्छित्यै शिव इत्यक्षर द्वयम् ।
अलं नमस्क्रिया मुक्तो मुक्तये परिकल्प्यते ॥

दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव च ।
अर्चितं स्याज्जगत्सर्वं तेन वै स चराचरम् ॥
आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमम् ।
द्वितीययासनं दद्यात्पाद्यं दद्यात्तृतीयया ॥
चतुर्थ्यार्घः प्रदातव्यः पञ्चम्याचमनीयकम् ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥
यज्ञोपवीतमष्टम्या नवम्या गन्धमेव च ।
दशम्या पुष्पदानं स्यात् एकादश्या च धूपकम् ॥
द्वादश्या च तथा दीपं त्रयोदश्यार्चनं तथा ।
चतुर्दश्या स्तुतिं कृत्वा पञ्चदश्या प्रदक्षिणम् ॥
षोडश्योद्वासनं कुर्यात् शेषकर्माणि पूर्ववत् ।
स्नानं वस्त्रं च नैवेद्यं दद्यादाचमनीयकम् ॥
षण्मासात्सिद्धिमाप्नोति देवदेवं समर्चयन् ।
संवत्सरेण तेनैव सायुज्यमधिगच्छति ॥
हविषाग्नौ जले पुष्पैः ध्यानेन हृदये हरिः ।
अर्चन्ति सूरयो नित्यं जपेन रविमण्डले ॥
आदित्यमण्डले दिव्यं देवदेवमनामयम् ।
शङ्खचक्रगदापाणिं ध्यात्वा विष्णुमुपासते ॥

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
एतत्पठन् केवलमेव सूक्तं
दिने दिने भावित विष्णुबुद्धिः ।
स सर्वपापं प्रविहाय वैष्णवं
पदं प्रयात्यच्युततुष्टिदं नरः ॥
पत्रेषु पुष्पेषु फलेषु तोय-
ष्वक्रीतलभ्येषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मुक्त्यै किमर्थं क्रियते न यत्नः ॥

इत्येवमुक्तः पुरुषस्य विष्णोरर्चाविधिर्नैव मया नृपेन्द्र ।
अनेन नित्यं कुरु विष्णुपूजां प्राप्तं तदिष्टं यदि वैष्णवं पदम् ॥
इति श्री नरसिंहपुराणे विष्णोरर्चाविधिर्नाम द्विषष्टितमोऽध्यायः ॥

क्वचित्प्रियेण भुक्तं यद्रोचते तु मनीषिणाम् ।
दम्पत्योः प्रीतयागेन संगमः प्रीति .वर्द्धनः ॥
प्रियं यदा मे जायेत तदा सङ्गस्तु ते मयि ।
का प्रीतिः किं सुखं पुंसां वलाद्भोगेन योषिताम् ॥
अप्रीतां रोगिणीं नारीमन्तर्वर्त्नीं धृतव्रताम् ।
रजस्वलामकामां च न कामेत वलात्पुमान् ॥
प्रीणनं पालनं पोषं रञ्जनं मार्दवं दयाम् ।
कृत्वा वधूमुपगमेद्युवतिं प्रेमवान्पतिः ॥
युवती कुसुमे चैवं विधेयं सुखमिच्छता ॥
इत्युक्त्वाऽपितया साध्व्या स राजा स्मर विह्वलः ।
वलादाकृष्य तां हस्ते परिरेभे रिरंसया ।
तां स्पृष्टमात्रां सहसा तप्तायः पिण्ड सन्निभाम् ।
निर्दहन्तीमिवात्मान तत्याज भय विह्वलः ॥

राजोवाच—

अहोसुमहदाश्चर्यमिदं दृष्टं तव प्रिये ।
कथमग्निसम जात वपुः पल्लवकोमलम ॥
इत्थं सुविस्मितो राजा भीतः सा राजवल्लभा ।
प्रत्युवाच विहस्यैनं विनयेन शुचिस्मिता ॥

राज्युवाच—

राजन्मम पुरा वाल्ये दुर्वासा मुनिपुङ्गवः ॥
शैवीं पञ्चाक्षरीं विद्यां कारुण्येनोपदिष्टवान् ॥
तेन मन्त्राऽनुभावेन ममाङ्गं कलुषोज्झितम् ।
स्प्रष्टुं न शक्यते पुम्भिः सपापैर्दैववर्जितैः ॥
त्वया राजन् प्रकृतिना कुलटा गणिकादयः ।
मदिरास्वादनिरता निषेव्यन्ते सदा स्त्रियः ॥
न स्नानं क्रियते नित्यं न मन्त्रो जप्यते शुचिः ।
नाराध्यते त्वयेशानः कथं मां स्प्रष्टुमर्हसि ॥

राजोवाच—

तां समाख्याहि सुश्रोणि शैवीं पञ्चाक्षरीं शुभाम ।
विद्यां विध्वस्तपापोऽहं त्वयेच्छामि रतिं प्रिये ॥

राज्युवाच—

नाहं तवोपदेशं वै कुर्यां मम गुरुर्भवान् ।
उपातिष्ठ गुरुं राजन् गर्गं मन्त्रविदां वरम् ॥

सि उवाच—

अष्टाक्षरं प्रवक्ष्यामि मन्त्राणां मन्त्रमुत्तमम्।
यं जपन् मुच्यते मर्त्यो जन्मसंसारबन्धनात् ॥
हृत् पुण्डरीकमध्यस्थं शङ्खचक्रगदाधरम्।
एकाग्रमनसा ध्यात्वा विष्णुं कुर्याज्जपं द्विजः
एकान्ते निर्जनस्थाने विष्णवग्रे वा जलान्तिके।
जपेदष्टाक्षर मन्त्र चित्ते विष्णुं निधाय वै ॥
अष्टाक्षरस्य मन्त्रस्य ऋषिर्नारायणः स्वयम्।
छन्दश्च देवी गायत्री परमात्मा च देवता ॥

शुक्लवर्णञ्च ॐकारं नकार रक्तमुच्यते।
मोकार वर्णत. कृष्णं नाकार रक्तमुच्यते ॥
राकार कुङ्कुमाभ तु यकार पीतमुच्यते।
णाकारमञ्जनाभ तु यकार बहुवर्णकम् ॥

ओं नमो नारायणायेति मन्त्रः सर्वार्थ साधकः।
भक्तानां जपतां तात स्वर्गमोक्षफलप्रदः ॥
वेदानां प्रणयेनैव सिद्धो मन्त्रः सनातनः।
सर्वपाप हरः श्रीमान् सर्वमन्त्रेषु चोत्तम. ॥

एनमष्टाक्षर मन्त्र जपन्नारायण स्मरेत्।
सन्ध्यावसाने सतत सर्वपापै. प्रमुच्यते ॥
एष एव परो मन्त्र एष एवं परं तप.।
एष एव परो मोक्ष एष स्वर्ग उदाहृत. ॥

सर्ववेदरहस्येभ्य. सार एष समुद्धृतः।
विष्णुना वैष्णवानां हि हिताय मनुजां पुरा ॥
एवं ज्ञात्वा ततो विप्रः अष्टाक्षरमिमं स्मरेत्।
स्नात्वा शुचि. शुचौ देशे जपेत्पापविशुद्धये ॥

जपे दाने च होमे च गमने ध्यानपर्वसु।
जपेन्नारायणं मन्त्र कर्मपूर्वे परे तथा ॥
मासि मासि तु द्वादश्यां विष्णुभक्तो द्विजोत्तमः।
स्नात्वा शुचिर्जपेद्यस्तु नमो नारायणं शतम् ॥
स गच्छेत्परमं देवं नारायणमनामयम्।
गन्धपुष्पादिभिर्विष्णुमनेनाराध्य यो जपेत् ॥

शैवी पंचाक्षरी विद्या यदा ते हृदयं गता।
अघानां कोटयस्त्वत्तः काकरूपेण निर्गताः॥
आसंस्तवाद्य राजेन्द्र दग्धाः पातक कोटयः।
अनया सह पूतात्मा विहरस्व यथासुखम्॥
इत्याभाष्य मुनिश्रेष्ठस्तं मन्त्रमुपदिश्य च।
ताभ्यां विस्मितचित्ताभ्यां स्तुहितः स्वगृहं ययौ॥
गुरुवर्य्यमनुज्ञाप्य मुदितौ तौ च दम्पती।
ततः स्वभवनं प्राप्य रेजतुः स महाद्युती॥
राजा दृढं समाश्लिष्य पत्नीं चन्दनशीतलाम्।
संतोषं परमं लेभे निःस्वः प्राप्य यथा धनम्॥
अशेषवेदोपनिषत्पुराणशास्त्रावतंसोऽयमघान्तकारी।
पचाक्षरस्यैव महाप्रभावो मया समासात्कथितो वरिष्ठः॥
इति श्रीस्कन्द पुराणे ब्रह्मखण्डान्तर्गत ब्रह्मोत्तर खण्डे प्रथमाध्यायः॥

पञ्चाक्षर माहात्म्यम्

शिवपुराणे (वा० सं० उत्तरभागे १२ अध्याये)

श्रीकृष्ण उवाच—

महर्षिवर सर्वज्ञ सर्वज्ञानमहोदधे।
पञ्चाक्षरस्य माहात्म्यं श्रोतुमिच्छामि तत्त्वतः॥

उपमन्युरुवाच—

पञ्चाक्षरस्य माहात्म्यं वर्षकोटिशतैरपि।
अशक्यं विस्तराद्वक्तुं तस्मात् संक्षेपतः शृणु॥
वेदे शिवागमे चायमुभयत्र षडक्षरः।
मन्त्रः स्थितः सदा मुख्यो लोके पञ्चाक्षरः स्मृतः॥
सर्वमन्त्राधिकश्चायमोङ्काराद्यः षडक्षरः।
सर्वेषां शिवभक्तानामशेषार्थप्रसाधकः॥
तदल्पाक्षरमर्थाढ्यं वेदसारं विमुक्तिदम्।
आज्ञासिद्धमसन्दिग्धं वाक्यमेतच्छिवात्मकम्॥
नानासिद्धियुतं दिव्यं लोकचित्तानुरञ्जकम्।
सुनिश्चितार्थगम्भीरं वाक्यं तत् पारमेश्वरम्॥

हे पुत्र शिष्याः शृणुत न मन्त्रोऽष्टाक्षरात्परः ।
सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते ॥
वेदाच्छास्त्रं परं नास्ति न देवः केशवात्परः ।
आलोच्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ।
इत्येतत् सकलं प्रोक्त शिष्याणां तव पुण्यदम् ॥
कथाश्च विविधाः प्रोक्ता मया भज जनार्दनम् ।
अष्टाक्षरमिमं मन्त्रं सर्वदुःख विनाशनम् ॥
जप पुत्र महाबुद्धे यदि सिद्धिमभीप्ससि ।
इमं स्तवं व्यासमुखाद्विनिःसृतं संध्यात्रये ये पुरुषाः पठन्ति ।
ते धौतपाण्डुरपटा इव राजहंसाःसंसारसागरमपेतभयास्तरन्ति ॥

अथ पञ्चाक्षर मंत्र माहात्म्यम् ।

तद्यथा स्कन्द पुराणे ब्रह्मखण्डान्तर्गत ब्रह्मोत्तर खण्डे १ अध्याये

ॐ नमः शिवाय ।

ज्योतिर्मात्र स्वरूपाय निर्मलज्ञानचक्षुषे ।
नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

ऋषय ऊचुः—

आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ।
समस्ताघहरं पुण्यं समासेन श्रुतं च नः ॥
इदानीं श्रोतुमिच्छामो माहात्म्यं त्रिपुरद्विषः ।
तद्भक्तानां च माहात्म्यमशेषाघहरं परम् ॥
तन्मन्त्राणां च माहात्म्यं तथैव द्विजसत्तम ।
तत्कथायाश्च तद्भक्तैः प्रभावमनुवर्णय ॥

सूत उवाच—

एतावदेव मर्त्यानां परं श्रेयः सनातनम् ।
यदीश्वरकथायां वै जाता भक्तिरहैतुकी ॥
अतस्तद्भक्तिलेशस्य माहात्म्यं वर्ण्यते मया ।
अपि वर्षायुतानालं वक्तुं विस्तरतः क्वचित् ॥

एतावत् तु शिवज्ञानमेतावत् परमं पदम्।
यदोंनमःशिवायेति शिववाक्यं षडक्षरम्॥
विधिवाक्यमिदं शैवं नार्थवादं शिवात्मकम्।
यः सर्वज्ञः स सम्पूर्णः स्वभावविमलः शिवः॥
लोकानुग्रहकर्त्ता च स मृषार्थं कथं वदेत्।
यद् यथावस्थितं वस्तु गुणदोषैः स्वभावतः।
यावत् फलञ्च यत् पुण्यं सर्वज्ञस्तु तथा वदेत्॥
रागाज्ञानादिभिर्दोषैर्ग्रस्तत्वादनृतं वदेत्।
ते चेश्वरे न विद्यन्ते ब्रूयात् स कथमन्यथा॥
अज्ञातदोषदोषेण सर्वज्ञेन शिवेन यत्।
प्रणीतममलं वाक्यं तत् प्रमाणं न संशयः॥
तस्मादीश्वरवाक्यानि श्रद्धेयानि विपश्चिता।
यथार्थं पुण्यपापेषु तदश्रद्धो व्रजत्यधः॥
स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत् सुशोभनम्।
वाक्यं मुनिवरैः शान्तैस्तद्विज्ञेयं सुभाषितम्॥
राग-द्वेषानृत-क्रोध-काम-तृष्णानुसारि यत्।
वाक्यं निरयहेतुत्वात् तद्दुर्भाषितमुच्यते॥
सत्कृतेनापि किं तेन मृदुना ललितेन वा।
अविद्यारागवाक्येण संसारक्लेशहेतुना॥
यच्छ्रुत्वा जायते श्रेयो रागादीनाञ्च संक्षयः।
विरूपमपि तद्वाक्यं विज्ञेयमतिशोभनम्॥
बहुत्वेऽपि हि मन्त्राणां सर्वज्ञेन शिवेन यत्।
प्रणीतममलं मन्त्रं न तेन सदृशं क्वचित्॥
शिवज्ञानानि यावन्ति विद्यास्थानानि यानि च।
षडक्षरस्य सूत्रस्य तानि भाष्यं समासतः॥
किं तस्य बहुभिर्मन्त्रैः शास्त्रैर्वा बहुविस्तरैः।
यस्योंनमःशिवायेति मन्त्रोऽयं हृदि संस्थितः॥
तेनाधीतं श्रुतं तेन कृतं सर्वमनुष्ठितम्।
येनोंनमःशिवायेति मन्त्राभ्यासः स्थिरीकृतः॥
नमस्कारादिसंयुक्तं शिवायेत्यक्षरत्रयम्।
जिह्वाग्रे वर्त्तते यस्य सफलं तस्य जीवितम्॥

उपदिष्टः सद्गुरुणा जप्तः क्षेत्रे च पावने ।
सद्यो यथेप्सितां सिद्धिं ददातीति किमद्भुतम् ॥
अतः सद्गुरुमाश्रित्य ग्राह्योऽयं मन्त्रनायकः ।
पुण्यक्षेत्रेषु जप्तव्य. सद्यः सिद्धिं प्रयच्छति ॥
गुरवो निर्मलाः शान्ताः साधवो मितभाषिणः ।
कामक्रोधविनिर्मुक्ताः सदाचारा जितेन्द्रियाः ॥
एतैः कारुण्यतो दत्तो मन्त्र. क्षिप्र प्रसिद्ध्यति ।
क्षेत्राणि जपयोग्यानि समासात्कथयाम्यहम् ॥
प्रयाग पुष्कर रम्य केदारं सेतुबन्धनम् ।
गोकर्णं नैमिषारण्यं सद्य. सिद्धिकर नृणाम् ॥

कलावती कथा ।

अत्रानुवर्ण्यते सद्भिरितिहास. पुरातनः ।
असकृद्वा सकृद्वापि शृण्वतां मङ्गलप्रदः ॥
मथुरायां यदुश्रेष्ठो दाशार्ह इति विश्रुतः ।
बभूव राजा मतिमान् महोत्साहो महाबलः ॥
शास्त्रज्ञो नयवाक् शूरो धैर्य्यवानमितद्युति. ।
अप्रधृष्यः सुगम्भीरः सङ्ग्रामेष्वनिवर्तित. ॥
महारथो महेष्वासो नानाशास्त्रार्थकोविदः ।
वदान्यो रूपसम्पन्नो युवा लक्षणसयुतः ॥
स काशिराजतनयामुपयेमे वराननाम् ।
कान्तां कलावतीं नाम रूपशीलगुणान्विताम् ॥
कृतोद्वाहः स राजेन्द्रः संप्राप्य निजमन्दिरम् ।
रात्रौ तां शयनारूढां सगमाय समाह्वयत् ॥
सा समर्त्रा समाहूता बहुश प्रार्थिता सती ।
न बबन्ध मनस्तस्मिन्न चागच्छत्तदन्तिकम् ॥
संगमाय यदाहूता नागता निजवल्लभा ।
बलादाहर्तुकामस्तामुदतिष्ठन्महीपतिः ॥

राज्ञ्युवाच—

मा मां स्पृश महाराज कारणज्ञां व्रते स्थिताम् ।
धर्माधर्मौ विजानासि मा कार्षीः साहसं मयि ॥

अम्भक्षा वायुभक्षाश्च ये चान्ये व्रतकर्शिताः ।
तेषामेतैर्व्रतैर्नास्ति मम लोकसमागमः ॥
भक्त्या पञ्चाक्षरेणैव यो हि मां सकृदर्चयेत् ।
सोऽपि गच्छेन्मम स्थानं मन्त्रस्यास्यैव गौरवात् ॥

तस्मात् तपांसि यज्ञाश्च व्रतानि नियमांस्तथा ।
पञ्चाक्षरार्चनस्यैते कोट्यंशेनापि नो समाः ॥
बद्धो वाऽप्यथवा मुक्तः पाशात् पञ्चाक्षरेण यः ।
पूजयेन्मां स मुच्येत नात्र कार्या विचारणा ॥

अरुद्रो वा सरुद्रो वा सकृत् पञ्चाक्षरेण यः ।
पूजयेत् पतितो वापि मूढो वा मुच्यते नरः ॥
षडक्षरेण वा देवि तथा पञ्चाक्षरेण वा ।
स ब्रह्माङ्गेण मां भक्त्या पूजयेद् यदि मुच्यते ॥
पतितोऽपतितो वापि मन्त्रेणानेन पूजयेत् ।
मम भक्तो जितक्रोधो ह्यलब्धो लब्ध एव वा ॥

अलब्धाल्लब्ध एवेह कोटिकोटिगुणाधिकः ।
तस्माल्लब्ध्वैव मां देवि मन्त्रेणानेन पूजयेत् ॥
लब्ध्वा सम्पूजयेद् यस्तु मैत्र्यादिगुणसंयुतः ।
ब्रह्मचर्यरतो भक्त्या मत्सादृश्यमवाप्नुयात् ॥
किमत्र बहुनोक्तेन भक्ताः सर्वेऽधिकारिणः ।
मम पञ्चाक्षरे मन्त्रे तस्माच्छ्रेष्ठतरो हि सः ॥

तस्मादनेन मन्त्रेण मनोवाक्कायभेदतः ।
आवयोरर्चनं कुर्याज्जपहोमादिकं तथा ॥

यथाप्रज्ञं यथाश्रद्धं यथाकालं यथामति ।
यथाशक्ति यथासम्पद् यथायोगं यथारति ॥
यदा कदापि वा भक्त्या यत्र कुत्रापि वा कृता ।
येन केनापि वा देवि पूजा मुक्तिं नयिष्यति ॥

मय्यासक्तेन मनसा यत् कृतं मम सुन्दरि ।
मत्प्रियश्च शिवश्चैव क्रमेणाप्यक्रमेण वा ॥
तथापि मम भक्ता ये नात्यन्तविवशाः पुनः ।
तेषामर्थे तु शास्त्रेषु मयैव नियमः कृतः ॥

सूत उवाच—

इति संभाषमाणौ तौ दम्पती गर्गसन्निधिम् ॥
प्राप्य तच्चरणौ मूर्ध्ना ववन्दाते कृताञ्जली ॥
अथ राजा गुरुं प्रीतमभिपूज्य पुनः पुनः ।
समाचष्ट विनीतात्मा रहस्यात्ममनोरथम् ॥

राजोवाच—

कृतार्थं मां कुरु गुरो संप्राप्त करुणार्द्रधीः ।
शैवीं पञ्चाक्षरीं विद्यामुपदेष्टुं त्वमर्हसि ॥
अनाज्ञातं यदाज्ञातं यत्कृतं राजकर्मणा ।
तत्पापं येन शुद्ध्येत तन्मन्त्र देहि मे गुरो ॥
एवमभ्यर्थितो राज्ञा गर्गो ब्राह्मणपुङ्गवः ।
तौ निनाय महापुण्य कालिन्द्यास्तटमुत्तमम् ॥
तत्र पुण्यतरोर्मूले निषण्णोऽथ गुरुः स्वयम् ।
पुण्यतीर्थजले स्नातं राजानं समुपोषितम् ॥
प्राङ्मुखं चोपवेश्याऽथ नत्वा शिवपदाम्बुजम् ।
तन्मस्तके करं न्यस्य ददौ मन्त्र शिवात्मकम् ॥
तन्मन्त्रधारणादेव तद्गुरोर्हस्तसङ्गमात् ।
निर्ययुस्तस्य वपुषो वायसाः शतकोटयः ॥
ते दग्धपक्षाः क्रोशन्तो निपतन्तो महीतले ।
भस्मीभूतास्ततः सर्वे दृश्यन्ते स्म सहस्रशः ॥
दृष्ट्वा तद्वायसकुलं दह्यमान सुविस्मितौ ।
राजा च राजमहिषी त गुरु पर्यपृच्छताम् ॥
भगवन्निदमाश्चर्यं कथ जात शरीरतः ।
वायसानां कुल दृष्ट किमेतत्साधु भण्यताम् ॥

श्रीगुरुरुवाच—

राजन्भवसहस्रेषु भवता परिधावता ।
संचितानि दुरन्तानि सन्ति पापान्यनेकशः ॥
तेषु जन्मसहस्रेषु यानि पुण्यानि सन्ति ते ।
तेषामाधिक्यतः क्वापि जायते पुण्ययोनिषु ॥
तथा पापीयसीं योनिं क्वचित्पापेन गच्छति ।
साम्ये पुण्यानयोश्चैव मानुषीं योनिमाप्तवान् ॥

शिवश्चास्तु शुभश्चास्तु शोभनोऽस्तु प्रियोऽस्त्विति।
एवं दद्याद्गुरुर्मन्त्रमाज्ञाञ्चैव ततः परम् ॥

जपविधिः

एवं लब्ध्वा गुरोर्मन्त्रमाज्ञाञ्चैव समाहितः।
संकल्प्य च जपेन्नित्यं पुरश्चरणपूर्वकम् ॥
यावज्जीवं जपेन्नित्यमष्टोत्तरसहस्रकम्।
अनन्यस्तत्परो भूत्वा स याति परमां गतिम् ॥
जपेदक्षरलक्षं वै चतुर्गुणितमादरात्।
नक्ताशी संयमी यः स पौरश्चरणिकः स्मृतः ॥
यः पुरश्चरणं कृत्वा नित्यजापी भवेत् पुनः।
तस्य नास्ति समो लोके स सिद्धः सिद्धिदो भवेत् ॥
स्नानं कृत्वा शुचौ देशे बद्ध्वा रुचिरमासनम्।
त्वया मां हृदि सञ्चिन्त्य सञ्चिन्त्य स्वगुरुं ततः ॥
उदङ्मुखः प्राङ्मुखो वा मौनी चैकाग्रमानसः।
विशोध्य पञ्चतत्त्वानि दहनप्लावनादिभिः ॥
मन्त्रन्यासादिकं कृत्वा सकलीकृतविग्रहः।
आवयोर्विग्रहं ध्यायन् प्राणापानौ नियम्य च ॥
विद्यास्थानं स्वकं रूपमृषिं छन्दोऽधिदैवतम्।
बीजं शक्तिं तथा वाच्यं स्मृत्वा पञ्चाक्षरीं जपेत् ॥
उत्तमं मानसं जाप्यमुपांशु मध्यमं विदुः।
अधमं वाचिकं प्राहुरागमार्थविशारदाः ॥
यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः।
मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः ॥
जिह्वामात्रपरिस्पन्दादीषदुच्चारितोऽपि वा।
अपरैरश्रुतः किञ्चिच्छ्रुतो वोपांशुरुच्यते ॥
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम्।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः ॥
वाचिकस्त्वेक एव स्यादुपांशु शतमुच्यते।
साहस्रो मानसः प्रोक्तः सगर्भस्तु शताधिकः ॥
प्राणायामसमायुक्तः सगर्भो जप उच्यते।
आद्यन्तयोरगर्भोऽपि प्राणायामः प्रशस्यते ॥

मन्त्रं सुखमुखोच्चार्य्यमशेषार्थप्रसिद्धये ।
प्राहों नमः शिवायेति सर्वज्ञः सर्वदेहिनाम् ॥
तद्बीजं सर्वविद्यानां मन्त्रमाद्यं षडक्षरम् ।
अतिसूक्ष्मं महार्थञ्च ज्ञेयं तद्वटबीजवत् ॥
देवो गुणत्रयातीतः सर्वज्ञः सर्वकृत् प्रभुः ।
ओमित्येकाक्षरे मन्त्रे स्थितः सर्वगतः शिवः ॥
ईशानाद्यानि सूक्ष्माणि ब्रह्माण्येकाक्षराणि तु ।
मन्त्रे नमः शिवायेति संस्थितानि यथाक्रमम् ॥
मन्त्रे षडक्षरे सूक्ष्मे पञ्चब्रह्मतनुः शिवः ।
वाच्यवाचकभावेन स्थितः साक्षात् स्वभावतः ॥
वाच्यः शिवः प्रमेयत्वान्मंत्रस्तद्वाचकः स्मृतः ।
वाच्यवाचकभावोऽयमनादिः संस्थितस्तयोः ॥
यथानादिः प्रवृत्तोऽयं घोरसंसारसागरः ।
शिवोऽपि हि तथानादिः संसारान्मोचकः स्थितः ॥
व्याधीनां भेषजं यद्वत् प्रतिपक्षः स्वभावतः ।
तद्वत् संसारदोषाणां प्रतिपक्षः शिवः स्मृतः ॥
असत्यस्मिन् जगन्नाथे तमोभूतमिदं भवेत् ।
आदित्येन यथा हीनं निरालोकमिदं जगत् ॥
अभावादीश्वरस्येयं जगत्सृष्टिः कथं भवेत् ।
अचेतनत्वात् प्रकृतेरज्ञत्वात् पुरुषस्य च ॥
प्रधानपरमाण्वादि यावत् किञ्चिदचेतनम् ।
न तत्कर्तृ स्वयं दृष्टं बुद्धिमत् कारणं विना ॥
धर्माधर्मोपदेशश्च बन्धमोक्षविचारणा ।
न सर्वज्ञं विना पुंसामादिसर्गे प्रसिध्यति ॥
वैद्यं विना निरानन्दाः क्लिश्यन्ते रोगिणो यथा ।
शिवं विना निरानन्दं क्लिश्यते हि जगत् तथा ॥
तस्मादनादिः सर्वज्ञः परिपूर्णः सदा शिवः ।
अस्ति नाथः परित्राता पुंसां संसारसागरात् ॥
आदिमध्यान्तनिर्मुक्तः स्वभावविमलः प्रभुः ।
सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥
तस्याभिधानं मन्त्रोऽयमभिधेयश्च स स्मृतः ।
अभिधानाभिधेयत्वान्मन्त्रः सिद्धः परः शिवः ॥

जपनियमाः

उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गलावृतः।
अपवित्रकरोऽशुद्धो विलपन्न जपेत् क्वचित्॥
क्रोधं मदं क्षुतं त्रीणि निष्ठीवनविजृम्भणे।
दर्शनञ्च श्व-नीचानां वर्जयेज्जपकर्म्मणि॥
आचामेत् सम्भवे तेषां स्मरेद्वा मां त्वया सह।
ज्योतींषि च प्रपश्येद्वा कुर्य्याद्वा प्राणसंयमम्॥
अनासनः शयानो वा गच्छन्नुत्थित एव वा।
रथ्यायामशिवे स्थाने न जपेत् तिमिरान्तरे॥
प्रसार्य्य न जपेत् पादौ कुक्कुटासन एव वा।
यान-शय्याधिरूढो वा चिन्ताव्याकुलितोऽथवा॥
शक्तश्चेत् सर्वमेवैतदशक्तः शक्तितो जपेत्॥
किमत्र बहुनोक्तेन समासेन वचः शृणु।
सदाचारो जपन् शुद्धं ध्यायन् भद्रं समश्नुते॥
आचारः परमो धर्म आचारः परमं धनम्।
आचारः परमा विद्या आचारः परमा गतिः॥
आचारहीनः पुरुषो लोके भवति निन्दितः।
परत्र च सुखी न स्यात् तस्मादाचारवान् भवेत्॥
यस्य यद्विहितं कर्म वेदे शास्त्रे च वैदिकैः।
तस्य तेन समाचारः सदाचारो न चेतरः॥
सद्भिराचरितत्वाच्च सदाचारः स उच्यते।
सदाचारस्य तस्याहुरास्तिक्यं मूलकारणम्॥
आस्तिकश्चेत् प्रमादाद्यैः सदाचारादपि च्युतः।
न दुष्यति नरो नित्यं तस्मादास्तिकतां व्रजेत्॥
यथेहास्ति सुखं दुःखं सुकृतैर्दुष्कृतैरपि।
तथा परत्र चास्तीतिमतिरास्तिक्यमुच्यते॥

पञ्चाक्षरं परित्राणं पतितस्यान्त्यजस्य च।

रहस्यमन्यद्वक्ष्यामि गोपनीयमिदं प्रिये।
न वाच्यं यस्य कस्यापि नास्तिकस्याथवा पशोः॥
सदाचारविहीनस्य पतितस्यान्त्यजस्य च।
पञ्चाक्षरात् परं नास्ति परित्राणं कलौ युगे॥

अन्त्यजो वाऽधमो वापि मूर्खो वा पण्डितोऽपि वा।
पञ्चाक्षरजपे निष्ठो मुच्यते पापपञ्जरात् ॥
इत्युक्त परमेशेन देव्या पृष्टेन शूलिना।
हिताय सर्वमर्त्यांना तिष्यजाना विशेषत ॥

शिवपार्वती संवादः

देवी-उवाच—

कलौ कलुषिते काले दुर्जये दुरतिक्रमे।
अपुण्यतमसाच्छन्ने लोके धर्म्मपराङ्मुखे ॥
क्षीणे वर्णसमाचारे सङ्करे समुपस्थिते।
सर्वाधिकारे सन्दिग्धे निश्चिते वा विपर्य्यये ॥
तदोपदेशे विहते गुरुशिष्यक्रमे गते।
केनोपायेन मुच्यन्ते भक्तास्तव महेश्वर ॥

महेश्वर उवाच—

आश्रित्य परमा विद्या हृद्या पञ्चाक्षरी मम।
भक्त्या च भावितात्मानो मुच्यन्ते कलिजा नरा ॥
मनोवाक्कायजैर्दोषैर्वक्तु सर्तुमगोचरे.।
दूपिताना कृतघ्नाना निर्दयाना खलात्मनाम् ॥
लुब्धानां वक्रमनसामपि मत्प्रवणात्मनाम्।
मम पञ्चाक्षरीविद्या ससारभयतारिणी ॥
मयैवमसकृद्देवि प्रतिज्ञात धरातले।
पतितोऽपि विमुच्येत मद्भक्तो विद्ययानया ॥

देवी उवाच—

कर्मायोग्यो भवेन्मर्त्यं पतितो यदि सर्वथा।
कर्मायोग्येन यत् कर्म कृतञ्च नरकाय हि।
तत कथ विमुच्येत पतिता विद्ययानया ॥

[ई]श्वर उवाच—

सत्यमेतत् त्वया प्रोक्त तथा हि शृणु सुन्दरि।
रहस्यमिति मत्वैतद्गोपित यन्मया पुरा ॥
समन्त्रक मा पतित पूजयेद् यदि मोहित।
नारकी स्यान्न सन्देहो मम पञ्चाक्षर विना ॥

अथ पञ्चाक्षर जपः

शिवपुराणे विद्येश्वर संहितायां १५ अध्याये—

सूत उवाच

जप योगमथो वक्ष्ये गदतः शृणुत द्विजाः ।
तपः कर्त्तुर्जपः प्रोक्तो यज्जपन् परिमार्जते ॥
शिवनाम नमः पूर्वं चतुर्थ्यां पञ्चतत्त्वकम् ।
स्थूल प्रणव रूपं हि शिवपञ्चाक्षरं द्विजाः ॥
पञ्चाक्षर जपेनैव सर्वसिद्धिं लभेन्नरः ।
प्रणवेनादि संयुक्तं सदा पञ्चाक्षरं जपेत् ॥
गुरूपदेशं संगम्य सुखवासे सुभूतले ।
पूर्वपक्षे समारभ्य कृष्णाभूतावधि द्विजाः ॥
माघं भाद्रं विशिष्टं तु सर्वकालोत्तमोत्तमम् ।
एकवारं मिताशी तु वाग्यतो नियतेन्द्रियः ॥
स्वस्य राज्य पितॄणाञ्च शुश्रूषणञ्च नित्यशः ।
सहस्रजपमात्रेण भवेच्छुद्धोऽन्यथा ऋणी ॥
पञ्चाक्षरं पञ्चलक्षं जपेच्छिव मनुस्मरन् ।
पद्मासनस्थं शिवदं गङ्गा चन्द्रकलान्वितम् ॥
वामोरुस्थित शक्त्या च विराजन्तं महागणैः ।
मृगटङ्कधर देवं वरदाभय पाणिकम् ॥
सदानुग्रहकर्त्तारं सदाशिवमनुस्मरन् ।
सम्पूज्य मनसापूर्वं हृदये सूर्यमण्डले ॥
जपेत्पञ्चाक्षरीं विद्यां प्राङ्मुखः ऊर्द्ध्वकर्म कृत ।
प्रातः कृष्ण चतुर्दश्यां नित्यकर्म समाप्य च ॥
मनोरमे शुचौ देशे नियतः शुद्धमानसः ।
पञ्चाक्षरस्य मन्त्रस्य सहस्रं द्वादशं जपेत् ॥

इत्याद्युक्त्वा—

एवं क्रमेण मुक्ताः स्युर्ब्राह्मणा वै जितेन्द्रियाः ।
अन्येषां च क्रमं वक्ष्ये गदतः शृणुतादरात् ॥
गुरूपदेशाज्जाप्यं वै ब्राह्मणानां नमोन्तकम् ।
पञ्चाक्षरं पञ्चलक्ष आयुष्यं प्रजयेद्विधिः ॥
क्षत्रियः पञ्च लक्षेण क्षत्रायमपनेष्यति ।
पुनश्च पञ्चलक्षेण क्षत्रियो ब्राह्मणो भवेत् ॥

मंत्रग्रहणविधिः

तत्रादौ सम्प्रवक्ष्यामि मन्त्रसंग्रहणं शुभम् ।
यद्विना निष्फलं जाप्यं येन वा सफलं भवेत् ॥
आज्ञाहीनं क्रियाहीन श्रद्धाहीनं वरानने ।
आज्ञार्थं दक्षिणाहीनं सदा जप्तञ्च निष्फलम् ॥
आज्ञासिद्धं क्रियासिद्धं श्रद्धासिद्धं मदात्मकम् ।
एवञ्चेद्दक्षिणायुक्तं मन्त्रसिद्धं महत्फलम् ॥
उपगम्य गुरुं विप्रमाचार्य्यं तत्त्ववेदिनम् ।
जापिनं सद्गुणोपेतं ध्यान-योगपरायणम् ॥
तोषयेत् तं प्रयत्नेन भावशुद्धिसमन्वितः ।
वाचा च मनसा चैव कायेन द्रविणेन च ॥
आचार्य्यं पूजयेच्छिष्यः सर्वदा हि प्रयत्नतः ।
हस्त्यश्व-रथ-रत्नानि क्षेत्राणि च गृहाणि च ॥
भूषणानि च वासांसि धान्यानि च धनानि च ।
एतानि गुरवे दद्याद्भक्त्या च विभवे सति ॥
वित्तशाठ्यं न कुर्वीत यदीच्छेत् सिद्धिमात्मनः ।
पश्चान्निवेदयेद्देवि स्वात्मानं सपरिच्छदम् ॥
एवं सम्पूज्य विधिवद् यथाशक्ति त्ववञ्चयन् ।
आददीत गुरोर्मन्त्रं ज्ञानञ्चैव क्रमेण तु ॥
एवं तुष्टो गुरुः शिष्यं पूजकं वत्सरोषितम् ।
शुश्रुषुमनहङ्कारं स्नातं शुचिमुपोषितम् ॥
स्नापयित्वा विशुद्ध्यर्थं पूर्णकुम्भघृतेन वै ।
जलेन मन्त्रशुद्धेन पुण्यद्रव्ययुतेन च ॥
अलङ्कृत्य सुवेषञ्च गन्धस्रग्वस्त्रभूषणैः ।
पुण्याहं वाचयित्वा च ब्राह्मणानभिपूज्य च ॥
समुद्रतीरे नद्याञ्च गोष्ठे देवालयेऽपि वा ।
शुचौ देशे गृहे वापि काले सिद्धिकरे तिथौ ॥
नक्षत्रे शुभयोगे च सर्वदोष विवर्जिते ।
अनुगृह्य ततो दद्याज्ज्ञानं मम यथाविधि ॥
स्वरेणोच्चारयेन् सम्यगेकान्तेऽतिप्रसन्नधीः ।
उच्चार्य्योच्चारयित्वा तमावयोर्मन्त्रमुत्तमम् ॥

प्रणवेन क्षिपेत्तेषु द्रव्याण्यालोक्य बुद्धिमान्।
अरुद्रो वा सरुद्रोवा सकृत्पञ्चाक्षरेण यः॥
पूजयेत्पतितो वापि मूढो वा मुच्यते नरः।
षडक्षरेण वा देवि तथा पञ्चाक्षरेण वा॥

सौर पुराणे ६५ अ०

पंचाक्षरेण मन्त्रेण पत्र पुष्पमथापि वा।
यः प्रयच्छति शर्वाय तदनन्तफलं सकृत्॥
दीक्षितोऽदीक्षितो वाऽपि विधानादन्यथाऽपि वा।
पञ्चाक्षरं जपेद्यस्तु शिवस्यानुचरो भवेत्॥
पंचाक्षरेण मन्त्रेण बिल्वपत्रैः शिवार्चनम्।
करोति श्रद्धया यस्तु स गच्छेदैश्वर पदम्॥

स्कंदपुराणे ब्र० उ० खं० अ० ३

अहो ईश्वरपूजायाः माहात्म्यं विस्मयावहम्।
पत्रमात्रेण संतुष्टो यो ददाति निजं पदम्॥
पञ्चाक्षरं परममन्त्रमशेषवेद वेदान्तसारमतिशोभनमादरेण॥
जप्त्वा सुराः प्रणवसंयुतमम्बिकेश दृष्ट्वा सभापतिमशेष गुरुं नतास्ते॥

अथ राम मंत्र महिमा।

कल्याणानां निधानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोः सपदि परपद प्राप्तये प्रस्थितस्य।
विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां
बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम॥

कलिसंतरणोपनिषत्।

हरिः ॐ। द्वापरान्ते नारदो ब्रह्माणं जगाम कथं भगवन् गां पर्यटन् कलिं सन्तरेयमिति। सहोवाच ब्रह्मा साधु पृष्टोऽसि सर्व-श्रुतिरहस्यं गोप्यं तच्छृणु येन कलिसंसारं तरिष्यसि। भगवत आदि-पुरुषस्य नारायणस्य नामोच्चारणमात्रेण निर्धूतकलिर्भवति। नारदः पुनः पप्रच्छ तन्नाम किमिति। सहोवाच हिरण्यगर्भः

हरे राम हरे राम राम राम हरे हरे॥
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥

चत्वारिंशत्समावृत्ति प्राणानायम्य संस्मरेत् ।
मन्त्रमन्त्रार्थविद्धीमानशक्तः शक्तितो जपेत् ॥
पञ्चकं त्रिकमेकं वा प्राणायामं समाचरेत् ।
अगर्भं वा सगर्भं वा सगर्भस्तत्र शस्यते ॥
सगर्भादपि साहस्रः सध्यानो जप उच्यते ।
एषु पञ्चविधेष्वेकः कर्त्तव्यः शक्तितो जपः ॥

जपमाला

अङ्गुल्या जपसंख्यानमेकमेकमुदाहृतम् ।
रेखयाष्टगुणं विद्यात् पुत्रजीवैर्दशाधिकम् ॥
शतं स्याच्छङ्खमणिभिः प्रवालैस्तु सहस्रकम् ।
स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्दशलक्षन्तु सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् ॥
त्रिंशदक्षैः कृता माला धनदा जपकर्मणि ।
सप्तविंशतिसंख्यातैरक्षैः पुष्टिप्रदा भवेत् ॥
पञ्चविंशतिसंख्यातैः कृता मुक्तिं प्रयच्छति ।
अक्षैस्तु पञ्चदशभिरभिचारफलप्रदा ॥

जपस्थानम्

गृहे जपं समं विद्याद्गोष्ठे शतगुणं विदुः ।
पुण्यारण्ये तथारामे सहस्रगुणमुच्यते ॥
अयुतं पर्वते पुण्ये नद्यां लक्षमुदाहृतम् ।
कोटिं देवालये प्राहुरनन्तं मम सन्निधौ ॥
सूर्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जलस्य च ।
विप्राणाञ्च गवाञ्चैव सन्निधौ शस्यते जपः ॥
तत्पूर्वाभिमुखं वश्यं दक्षिणञ्चाभिचारकम् ।
पश्चिमं धनदं विद्यादौत्तरं शान्तिदं भवेत् ॥
सूर्याग्निविप्रदेवानां गुरूणामपि सन्निधौ ।
अन्येषाञ्च प्रशस्तानां मन्त्रं न विमुखो जपेत् ॥

आब्रह्म बीजदोषाश्च नियमातिक्रमोद्भवाः ।
स्त्रीणां च पुरुषाणां च मन्त्रेणानेन नाशिताः ॥
येषु येष्वपि देशेषु रामभद्र उपास्यते ।
दुर्भिक्षादि भयं तेषु न भवेत्तु कदाचन ॥
शान्तः प्रसन्नवदनो ह्यक्रोधो भक्तवत्सलः ।
सम्यगाराधितो रामः प्रसीदत्येव सत्वरम् ।
ददात्यायुष्यमैश्वर्यं मन्ये विष्णुपदं च यत् ॥
यथैव वटबीजस्थः प्राकृतश्च महान् द्रुमः ॥
तथैव रामबीजस्थं जगदेतच्चराचरम् ॥
श्री रामाय नमो ह्येष तारकब्रह्मनामकम् ।
नाम्नां विष्णोः सहस्राणां तुल्य एव महामनुः ॥
भर्जनं भवबीजानामर्जनं सर्वसम्पदाम् ।
तर्जनं यमदूतानां रामनामेति गर्जनम् ॥

राम मंत्र माहात्म्यम् ।

स्कंदपुराणे चातुर्मास्यमाहात्म्ये २४ अध्याये

ततः सा विश्वजननी पार्वती प्राह शङ्करम् ।

महेश्वरी उवाच ।

इयं ते करगा नित्यमक्षमाला महेश्वर ।
त्वया किं जप्यते देव सन्देहयति मे मनः ॥
त्वमेकः सर्वभूतानामादिकृत्सकलेश्वरः ।
न माता न पिता बन्धुस्तव जातिर्न कश्चन ॥
अहं त्वत्तः परं किञ्चिद्वेद्मि नास्तीति किञ्चन ।
श्रमेण त्वं समायुक्तः श्वासोच्छ्वासपरायणः ॥
जपन्नपि महाभक्त्या दृश्यसे त्व मया सदा ।
त्वत्तः परतरं किञ्चिद्यत्त्वं ध्यायसि चेतसा ॥
तन्मे कथय देवेश यद्यहं दयिता तव ।
इति पृष्टस्तदा शम्भुरुवाच हरिसेवकः ॥

महेश्वर उवाच ।

हरेर्नाम सहस्राणां सारं ध्यायामि नित्यशः ॥
जपामि रामनामाङ्कमवतारं तु सत्तमम् ।

गच्छतस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः ।
अशुचेर्वा शुचेर्वापि मन्त्रोऽयं न च निष्फलः ॥
अनाचारवतां पुंसामविशुद्धषडध्वनाम् ।
अनादिष्टोऽपि गुरुणा मन्त्रोऽयं न च निष्फलः ॥
अन्त्यजस्यापि मूर्खस्य मूढस्य पतितस्य च ।
निर्मर्यादस्य नीचस्य मन्त्रोयं न च निष्फलः ॥
सर्वावस्थां गतस्यापि मयि भक्तिमतः परम् ।
सिध्यत्येव न सन्देहो नापरस्य तु कस्यचित् ॥
न लग्न-तिथि नक्षत्र वार योगादयः प्रिये ।
अस्यात्यन्तमवेक्ष्याः स्युर्नैष सुप्तः सदोदितः ॥
न कदाचिन्न कस्यापि रिपुरेष महामनुः ।
सुसिद्धो वापि सिद्धो वा साध्यो वापि भविष्यति ॥
सिद्धेन गुरुणादिष्टः सुसिद्ध इति कथ्यते ।
असिद्धेनापि वा दत्तः सिद्धः साध्यस्तु केवलः ॥
असाधितः साधितो वा सिध्यत्येव न संशयः ।
श्रद्धातिशययुक्तस्य मयि मन्त्रे तथा गुरौ ॥
तस्मान्मन्त्रान्तरांस्त्यक्त्वा सापायानधिकारतः ।
आश्रयेत् परमां विद्यां हृद्यां पंचाक्षरीं बुधः ॥
मन्त्रान्तरेषु सिद्धेषु मन्त्र एष न सिध्यति ।
सिद्धे त्वस्मिन् महामन्त्रे ते च सिद्धा भवन्त्युत ॥
यथा देवेष्वलभ्योऽस्मि लब्धेष्वपि महेश्वरि ।
मयि लब्धे तु ते लब्धा मन्त्रेष्वेष समो विधिः ॥
ये दोषाः सर्वमन्त्राणां न तेऽस्मिन् सम्भवन्त्यपि ।
अस्य मन्त्रस्य जात्यादीननपेक्ष्य प्रवर्त्तनात् ॥
तथापि नैव क्षुद्रेषु फलेषु प्रतियोगिषु ।
सहसा विनियुञ्जीत यस्मादेष महाफलः ॥

उपमन्युरुवाच ।

एवं साक्षान्महादेव्यै महादेवेन शूलिना ।
हिताय जगतामुक्तः पञ्चाक्षरविधिर्यथा ॥
य इदं कीर्तयेद्भक्त्या शृणुयाद्वा समाहितः ।
सर्वपापविनिर्मुक्तः प्रयाति परमां गतिम् ॥

इति श्रीशैवे महापुराणे वायवीयसंहितायामुत्तरभागे पञ्चाक्षरमन्त्रमाहात्म्य-
निरूपणं नाम द्वादशोऽध्यायः ॥१२॥

रामनाम माहात्म्यम्

महारामायणे श्रीशिववाक्य श्रीपार्वतीं प्रति—

शृणुष्व मुख्य नामानि वक्ष्ये भगवतः प्रिये ।
विष्णुर्नारायणः कृष्णो वासुदेवो हरिः स्मृतः ॥
ब्रह्म विश्वम्भरोऽनंतो विश्वरूपः कलानिधिः ।
कल्मषघ्नो दयामूर्तिः सर्वगः सर्वसेवितः ॥
परमेश्वरस्य नामानि संत्यनेकानि पार्वति ।
एकादेकं महत्स्वच्छमुच्चरन्मोक्षदायकम् ॥
नाम्नामेव च सर्वेषां रामनाम प्रकाशकः ।
ग्रहाणाञ्च यथा भानुर्नक्षत्राणां यथा शशी ॥
देवानांच यथा शक्रो नराणां भूपतिर्यथा ।
सर्व लोकेषु गोलोकः सरयूर्निम्नगासुच ॥
निर्जराणां यथानंतो भक्तानामजनीसुतः ।
शक्तीनां च यथा सीता रामो भगवतामपि ॥
भूधराणां यथा मेरुः सरसां सागरो यथा ।
कामधेनुर्गवांमध्ये धन्विनां मन्मथो यथा ॥
पक्षिणां वैनतेयश्च तीर्थानां पुष्करो यथा ।
अहिंसा सर्वधर्माणां साधुष्वेऽपि दया यथा ॥
मेदिनी क्षमिणां मध्ये मणीनां कौस्तुभो यथा ।
धनुषां च यथा शार्ङ्गं खड्गानां नन्दको यथा ॥
ज्ञानानां ब्रह्मज्ञानं च भक्तीनां प्रेमलक्षणा ।
प्रणवः सर्वमंत्राणां रुद्राणामहमेवच ॥
कल्पद्रुमश्च वृक्षाणां यथाऽयोध्या पुरीषु च ।
कर्मणां भगवत्कर्म अकारश्च स्वरेष्वपि ॥
किमत्र बहुनोक्तेन सम्यग्भगवतः प्रिये ।
नाम्नां तथा च सर्वेषां राम नाम परं महत् ॥

अथ श्रीराम स्तुतिः

नमो देवाधिदेवाय रघुनाथाय शार्ङ्गिणे ।
चिन्मयानंदरूपाय सीतायाः पतयेनमः ॥

वैश्यस्तु पञ्च लक्षेण वैश्यत्वमपनेष्यति ।
पुनश्च पञ्चलक्षेण मन्त्रक्षत्रिय उच्यते ॥
पुनश्च पञ्चलक्षेण क्षत्रत्वमपनेष्यति ।
पुनश्च पञ्चलक्षेण मन्त्रब्राह्मण उच्यते ॥
शूद्रश्चैव नमोन्तेन पञ्चविंशति लक्षतः ।
मन्त्र विप्रत्वमापद्य पश्चाच्छुद्धोभवेद्द्विजः ॥
नारीवाथ नरोवाथ ब्राह्मणो वाऽन्य एव वा ।
नमोऽन्तं वा नमः पूर्वमातुर सर्वदा जपेत् ॥

अथ शिवपूजनविधिः

शिवपुराणे ७ अध्याये

ऋषय ऊचुः—

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैर्वा शम्भु पूजनम् ।
कथं कार्य्यं तथा ब्रूहि यथा व्यासमुखाच्छ्रुतम् ॥
तच्छ्रुत्वा वचनं तेषां वचनं श्रुतिसम्मितम् ।
उवाच सकलं तत्र प्रश्नस्यानुक्रमेण तु ॥

सूत उवाच—

सम्यक् पृष्ट भवद्भिश्च यद्रहस्य मुनीश्वराः ।
तदहं कथयाम्यद्य यथाबुद्धि यथाश्रुतम् ॥
यो वै मानुषमाश्रित्य सुखसन्तानकामुकः ।
तेन पूज्यो महादेवः सर्वकामार्थ साधकः ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च विधिवत्क्रमात् ।
प्रातः काले समुत्थाय मुहूर्ते ब्राह्मसंज्ञके ॥
विण्मोक्ष स्मरणं कृत्वा गुरोर्ध्यवाऽथवा पुनः ।
तीर्थानां स्मरणं कृत्वा ध्यानञ्चैव हरेरिति ॥
देशकालाविरोधेन स्नानं कार्यं समन्त्रकम् ।
यथा योग्य विधिं कृत्वा पूजाविधिमथाचरेत् ॥
आचामत्रितयं कृत्वा प्रक्षाल्य च पुनः पुनः ।
प्राणायाम त्रयं कृत्वा ध्यायेद्देवं त्रियम्बकम् ॥
सर्वत्र प्रणवेनैव षडङ्गन्यासमाचरेत् ।
कृत्याद्यादिप्रयोगश्च ततः पूजां समाचरेत् ॥

सहस नाम सम सुनि शिव बानी। जपहिं जे पियके संग भवानी॥
हरषे हेतु हेरि हर ही को। किय भूषन तिय भूषन ती को॥
नाम प्रभाव जान शिव नीको। कालकूट फल दीन अमी को॥
वर्षा ऋतु रघुपति भगति तुलसी शालि सुदास।
रामनाम वर बरनयुग सावन भादौं मास॥
आखर मधुर मनोहर दोऊ। बरन बिलोचन जन जिय जोऊ॥
सुमिरत सुखद सुलभ सब काहू। लोक लाहु परलोक निबाहू॥
कहत सुनत समुझत सुठि नीके। राम लखन सम प्रिय तुलसी के॥
बरनत बरन प्रीति बिलगाती। ब्रह्म जीव सम सहज संघाती॥
नर नारायण सरिस सुभ्राता। जग पालक विशेष जन त्राता॥
भगति सुतिय कल करन विभूषन। जग हित हेतु विमल बिधुपूषन॥
स्वाद तोष सम सुगति सुधाके। कमठ शेष समधर वसुधाके॥
जन मन कंज मंजु मधुकर से। जीह जसोमति हरि हलधर से॥
एक छत्र एक मुकुटमनि सब बरननि पर जोउ।
तुलसी रघुवर नाम के बरन बिराजत दोउ॥
राम नाम मनि दीप धरु जीह देहरी द्वार।
तुलसी भीतर बाहिरउ जो चाहसि उंजियार॥
नाम सप्रेम जपत अनयासा। भगत होहिं मुदमंगल वासा॥
राम एक तापस तिय तारी। नाम कोटि खल कुमति सुधारी॥
सबरी गीध सुसेवकनि सुगति दीन्ह रघुनाथ।
नाम उधारे अमित खल वेद विदित गुन गाथ॥
नाम गरीब अनेक निवाजे। लोक वेद वर बिरद विराजे॥
नाम लेत भवसिन्धु सुखाहीं। करहु विचार सुजन मन मांही॥
सेवक सुमिरत नाम सप्रीती। बिनुश्रम प्रबल मोह दल जीती॥
ब्रह्म राम ते नाम बड़ बरदायक बर दानि।
रामचरित शतकोटि मँह लिय महेश जिय जानि॥
नाम प्रसाद शम्भु अविनाशी। साजु अमंगल मगलराशी॥
शुक सनकादि साधु मुनि जोगी। नाम प्रसाद ब्रह्मसुख भोगी॥
नारद जानेउ नाम प्रतापू। जग प्रिय हरि हरिहर प्रिय आपू॥
नाम जपत प्रभु कीन्ह प्रसादू। भगत शिरोमनि भे प्रह्लादू॥
ध्रुव सगलानि जपेउ हरि नाऊँ। पायेउ अचल अनूपम ठाऊँ॥
सुमिरि पवनसुत पावन नामू। अपने बस करि राखेउ रामू॥

इति षोडशकं नाम्नां कलिकल्मष नाशनम् ॥
नातः परतरोपायः सर्ववेदेषु दृश्यते ॥

इति षोडश कलस्य जीवस्यावरण विनाशकम् ॥
ततः प्रकाशते परंब्रह्म मेघापाये रविरश्मिमंडलीवेति । पुन नारदः पप्रच्छ भगवन् कोऽस्य विधिरिति । तं होवाच नास्य विधिरिति सर्वदा शुचिरशुचिर्वा पठन् ब्रह्मणः सलोकतां समीपतां सरूपतां सायुज्यतामेति । यदास्य षोडशीकस्य सार्धत्रिकोटीर्जपति तदा ब्रह्महत्यां तरति वीरहत्याम् । स्वर्णस्तेयात् पूतो भवति । पितृदेवमनुष्याणामपकारात् पूतो भवति । सर्वधर्मपरित्यागपापात् सद्यः शुचितामाप्नुयात् । सद्यो मुच्यते सद्यो मुच्यते इत्युपनिषत् । हरिः ॐ तत्सत् ॥

रामतापनी उपनिषत्

अथ हैनं भारद्वाजो याज्ञवल्क्यमुपसमेत्योवाच श्रीराममन्त्रराजस्य माहात्म्यमनुब्रूहीति । सहोवाच याज्ञवल्क्यः ।

स्वप्रकाशः परं ज्योतिः स्वानुभूत्यैक चिन्मयः ॥
तदेव रामचन्द्रस्य मनोराद्यक्षरः स्मृतः ॥ १ ॥
अखण्डैकरसानन्दस्तारकब्रह्मवाचकः ॥
रामायेति सुविज्ञेयः सत्यानन्दचिदात्मकः ॥ २ ॥
नमः पदं सुविज्ञेय पूर्णानन्दैककारणम् ॥
सदा नमन्ति हृदये सर्वे देवा मुमुक्षवः ॥ इति ॥

य एतं मन्त्रराज श्रीरामचन्द्रषडक्षरं नित्यमधीते सोऽग्निपूतो भवति । स वायुपूतो भवति । स आदित्यपूतो भवति । स सोमपूतो भवति । स ब्रह्मपूतो भवति । स विष्णुपूतो भवति । स रुद्रपूतो भवति । स सर्वैर्देवैर्ज्ञातो भवति । सर्वक्रतुभिरिष्टवान् भवति । तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि सफलानि भवन्ति । श्रीरामचन्द्रमनुस्मरणेन दशपूर्वान्दशोत्तरान् पुनाति सपङ्क्तिपावनो भवति । स महान् भवति । सोऽमृतत्वं च गच्छति ॥ अत्रैते श्लोका भवन्ति ।

श्री रामाय नमः

षडक्षरोऽयं मन्त्रः स्यात्सर्वाघौघनिवारणः ।
मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः ॥

कह नानक सोई नर सुखिया राम नाम गुन गावै।
और सकल जग माइया निरभय पद नहिं पावै॥
राम न जपहु अभाग तुम्हारा जुग दाता प्रभु राम हमारा॥
खिन महि राम नामि किलविखि काटे भये पवित्र शरीरा।
नानक राम नाम विस्तारा कञ्चन भरा मनूरा॥
पतित असंख्य पुनीत करि पुन पुन बलिहारि।
नानक राम नाम जपि पावको किलविष दाहनहार॥
राम नाम जपि हिरिदै माहीं नानक पति सेती घरि जाहीं॥
अण मंगिया दानु दीजे दाते तेरी भगति भरी भण्डारा।
राम नाम बिनु मुकुति न होई नानक कहे विचारा॥
सबते ऊँच राम परगासा। निसि बासर जपु नानकदासा॥
राम किरिपा करि लेहु उबारे। जिमि उपकरी द्रोपदी
आनि रही हरि लाज नियारे॥
शास्त्र वेद सोधि सोधि देखे मुनि नारद वचन प्रचारे।
राम नाम पढहु गनि पावहु सतसंगति गुरु निस्तारे॥

तनु धनु सम्पय सुख दीयो अरु जिह नीके धाम।
कहु नानक सुनु रे मना सिमिरत काहे न राम॥
पतित उधारन भै हरन हरि अनाथ के नाथ।
कहु नानक तिह जानिये सदा बसतु तुम साथ॥
घटि घटि में हरिजू बसै संतन कहिओ पुकार।
कहु नानक तिह भजु मना भउनिधि उतरहि पार॥
जनम जनम भरमत फिरिओ मिटिओ न जमका त्रासु।
कहु नानक हरि भजु मना निरभै पावहि बासु॥
बलु छुटिओ बंधन परे कछू न होतु उपाइ।
कहु नानक अब ओट हरि गज जिउ होहु सहाइ॥
संग सखा सब तजि गये कोउ न निबहिओ साथ।
कहु नानक इह बिपति में टेक एक रघुनाथ॥
राम नाम उरि मैं गहिओ जाकै सम नहिं कोय।
जिह सिमरत संकट मिटै दरसु तुहारो होय॥
रे मन ता कउ धियाइये सब बिधि जाकै हाथि।
राम नाम धन संचिये साथ निबाहै नाथि॥

चतुर्विंशति संख्याकान् प्रादुर्भावान् हरेर्गुणान् ।
रामेति द्व्यक्षरजपः सर्वपापापनोदकः ॥
गच्छंस्तिष्ठञ्छयानो वा मनुजो रामकीर्तनात् ।
इह निर्वृतिमायाति प्रान्ते हरिगणो भवेत् ॥
रामेति द्व्यक्षरो मन्त्रो मन्त्रकोटिशताधिकः ।
सर्वासां प्रकृतीनां च कथितः पापनाशकः ॥
न रामादधिकं किञ्चित्पठनं जगतीतले ।
रामनामाश्रया ये वै न तेषां यमयातना ॥
ये च दोषा विघ्नकरा मृतका विग्रहाश्च ये ।
रामनाम्नैव विलयं यान्ति नात्र विचारणा ॥
रमते सर्वभूतेषु स्थावरेषु चरेषु च ।
अन्तरात्मस्वरूपेण यच्च रामेति कथ्यते ॥
रामेति मन्त्रराजोऽयं भयव्याधिविषूदकः ।
रणे विजयदश्चापि सर्वकार्यार्थसाधकः ॥
सर्वतीर्थफलः प्रोक्तो विप्राणामपि कामदः ।
रामचन्द्रेति रामेति रामेति समुदाहृतः ॥
द्व्यक्षरो मन्त्रराजोऽयं सर्वकार्यकरो भुवि ।
देवा अपि प्रगायन्ति रामनाम गुणाकरम् ॥
तस्मात्त्वमपि देवेशि रामनाम सदा वद ।
रामनाम जपेद्यो वै मुच्यते सर्वकिल्बिषैः ॥
सहस्रनामजं पुण्यं रामनाम्नैव जायते ।
चातुर्मास्ये विशेषेण तत्पुण्यं दशधोत्तरम् ।
हीनजातिप्रजातानां महद्दहति पातकम् ॥
रामो ह्ययं विश्वमिदं समग्रं
स्वतेजसा व्याप्य जनान्तरात्मनः ।
पुनाति जन्मान्तरपातकानि
स्थूलानि सूक्ष्माणि क्षणाच्च दग्ध्वा ॥

गुरु रामदास समर्थ कृत ।

(दासबोध से)

सकल जनामध्ये नाम । राम नाम उत्तमोत्तम ।
श्रम जाउनी विश्राम । चन्द्रमौली पावला ॥
नामाचा महिमा थोर । रूप कैसें उत्तरोत्तर ।
परात्पर परमेश्वर । त्रयलोक्य धर्ता ॥
आत्माराम चहुं कड़े । लोक बावडे जिकडे तिकडे ।
देहे पडे मृत्यु घडे । आत्मयाचिए ॥
जीवात्मा शिवात्मा परमात्मा । जगदात्मा विश्वात्मा गुप्तात्मा ।
आत्मा अंतरात्मा सूक्ष्मात्मा । देवदानव मानवीं ॥
सकल मार्ग चालती बोलती । अवतार पंगतीची गती ।
आत्म्या करितां होत जाती । ब्रह्मादिक ॥
नादरूप जोतीरूप । साक्षरूप सत्तारूप ।
चैतन्यरूप सत्वरूप । द्रष्टारूप जाणिजे ॥
नरोत्तमु विरोत्तमु । पुरुषोत्तमु रघोत्तमु ।
सर्वोत्तमु उत्तमोत्तमु । त्रयलोक्यवासी ॥

अनन्य भक्ति और प्रार्थना ।

तुलसी ग्रंथावली से

एक भरोसो एक बल एक आस बिस्वास ।
रामरूप स्वाती जलद चातक तुलसीदास ॥
नातो नाते राम के राम सनेह सनेहु ।
तुलसी माँगत जोरि कर जनम जनम सिव देहु ॥
सब साधन को एक फल जेहि जान्यो सोइ जान ।
ज्यों त्यों मन मन्दिर बसहिं राम धरे धनु बान ॥
रामचन्द्र मुख चन्द्रमा चित चकोर जब होइ ।
राम राज सब काज सुभ समय सुहावन सोइ ॥
राम हैं मातु पिता गुरु बन्धु औ संगी सखा सुत स्वामि सनेही ।
राम की सौंह भरोसो है राम को राम रँग्यो रुचि राच्यो न केही ॥
जीवन राम मुये पुनि राम सदा रघुनाथहि की गति जेही ॥
सोइ जिये जग में तुलसी नतु डोलत और मुये धरि देही ॥

सर्वलोकशरण्याय रामचन्द्राय वेधसे ।
ब्रह्मानंदैकरूपाय सीतायाः पतये नमः ॥
विशुद्ध ज्ञानदेहाय रघुनाथाय विष्णवे ।
अंतःकरण संशुद्धिं देहि मे भक्तवत्सल ॥
नमो नारायणानंत श्रीराम करुणानिधे ।
मामुद्धर जगन्नाथ घोर संसार सागरात् ॥
रामचन्द्र महीपाल शरणागत तत्पर ।
मां त्राहि सर्वलोकेश तापत्रय महानलात् ॥
श्रीकृष्ण श्रीकर श्रीश श्रीराम श्रीनिधे हरे ।
श्रीनाथ श्रीमहाविष्णो श्रीनृसिंह कृपानिधे ॥
गर्भजन्मजराव्याधि घोर संसारसागरात् ।
मामुद्धर जगन्नाथ कृष्ण विष्णो जनार्दन ॥
श्रीराम गोविन्द मुकुन्द कृष्ण श्रीनाथ विष्णो भगवन्मुरारे।
श्रीवल्लभानन्त जगन्निवास श्रीरामराजेन्द्र नमो नमस्ते ॥
नमोस्तु नारायण विश्वमूर्ते नमोस्तुते शाश्वत सर्वयोनये ।
त्वमेव विश्वं सचराचर च त्वयैव सर्वं प्रवदंति संतः ॥
नमोस्तु ते कारण कारणाय नमोस्तु कैवल्य फलप्रदाय ।
नमोनमस्तेस्तु जगन्मयाय वेदांत वेद्याय नमोनमस्ते ॥
नमो नमस्ते भरताग्रजाय नमोस्तु यज्ञप्रतिपालकाय ।
अनन्त विश्वेश हरे मुकुंद गोविन्द विष्णो भगवन्नमस्ते ॥
श्रीवल्लभानंत जगन्निवास श्रीरामराजेन्द्र नमोनमस्ते ।
त्वया सनाथं कुरु मामनाथं नाथ प्रभो दीनदयालुमूर्ते ॥

राम नाम महिमा

तुलसीकृत रामायणे

बन्दौं नाम राम रघुबर को । हेतु कृशान भानु हिमकर को ॥
विधि हरिहर मय वेद प्रान सो । अगुन अनुपम गुन निधान सो ॥
महामंत्र जो जपत महेशू । काशी मुकति हेतु उपदेशू ॥
महिमा जासु जान गनराऊ । प्रथम पूजियत नाम प्रभाऊ ॥
जान आदि कवि नाम प्रतापू । भयउ शुद्ध करि उलटा जापू ॥

जो भुशुण्डि मन मानस हंसा । सगुण अगुण जेहि निगम प्रशंसा ॥
देखहि हम सो रूप भरि लोचन । कृपा करहु प्रणतारति मोचन ॥
तुम ब्रह्मादि जनक जगस्वामी । ब्रह्म सकल उर अन्तर्यामी ॥
अस समुझत मन संशय होई । कहा जो प्रभु प्रमाण पुनि सोई ॥
जे निज भक्त नाथ तव अहहीं । जो सुख पावहिं जो गति लहहीं ॥

सोइ सुख सोइ गति सोइ भगति सोइ निजचरण सनेहु ।
सोइ विवेक सोइ रहनि प्रभु मोहिं कृपाकरि देहु ॥

भागवते

नाम संकीर्त्तनं यस्य सर्वपाप प्रणाशनम् ।
प्रणामो दुःख शमनः तं नमामि हरिं परम् ॥
कृष्ण कृष्ण महाभाग विश्वात्मन्विश्व भावन ।
प्रपन्नं पाहि गोविन्द शरणागत वत्सल ॥
नान्यत्र पदाम्भोजात् पश्यामि शरणं नृणाम् ।
बिभ्यतां मृत्यु संसारादीश्वरस्यापवर्गिकात् ॥
नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ।
योगेश्वराय योगाय त्वामहं शरणं गतः ॥

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यं ऋतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥

त्वां प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे ।
यच्छ्रेयः पुण्डरीकाक्ष तद्ध्यायस्व सुरोत्तम ॥

श्रीकृष्णः शरणं मम ।
श्रीकृष्णार्पणमस्तु ॥

जपत अजामिल गज गनिकाउ । भए मुकत हरि नाम प्रभाउ ॥
कहउँ कहाँ लगि नाम बड़ाई । राम न सकहिं नाम गुन गाई ॥
नाम राम को कल्प तरु कलि कल्यान निवास ।
जो सुमिरत भव भांगते तुलसी तुलसी दास ॥
ध्यान प्रथम युग मख विधि दूजे । द्वापर परितोषत प्रभु पूजे ॥
कलि केवल मल मूल मलीना । पाप पयोनिधि जन मन मीना ॥
नाम कामतरु काल कराला । सुमिरत सुखद सुलभ सब काला ॥
राम नाम कलि अभिमत दाता । हित परलोक लोक पितु माता ॥
नहिं कलि करम न भगति बिवेकू । राम नाम अवलम्बन एकू ॥
कालनेम कलि कपट निधानू । नाम सुमति समरथ हनुमानू ॥
राम नाम नर केशरी कनक कशिपु कलि काल ॥
जापक जन प्रह्लाद जिमि पालिहिं दलि सुरसाल ॥
राम सच्चिदानन्द दिनेसा । नहिं तहँ मोह निसा लव लेसा ॥
सहज प्रकास रूप भगवाना । नहिं तहँ पुनि विज्ञान बिहाना ॥
हरष बिषाद ज्ञान अज्ञाना । जीव धरम अहमित अभिमाना ॥
राम ब्रह्म व्यापक जग जाना । परमानन्द परेस पुराना ॥
जेहि इमि गावहिं वेद बुध जाहि धरहिं मुनि ध्यान ।
सोइ दसरथ सुत भगत हित कोसलपति भगवान ॥
कासी मरत जंतु अवलोकी । जासु नामबल करउँ विशोकी ॥
सोइ प्रभु मोर चराचर स्वामी । रघुवर सब उर अंतर जामी ॥
बिबसहु जासु नाम नर कहहीं । जनम अनेक संचित अघ दहहीं ॥
सादर सुमिरन जे नर करहीं । भव वारिधि गोपद इव तरहीं ॥
राम सो परमातमा भवानी । तहँ भ्रम अति अविहित तव बानी ॥
अस संसय आनत उर माहीं । ज्ञान बिराग सकल गुन जाहीं ॥

गुरु नानक कृत रामनाम महिमा ।

राम नाम जपु दिनसु राती गुरुमुख हरि धनु जानु ।
सब सुख हरिरस भोगने सन्त सभा मिलि ज्ञान ॥
नानक मन समुझाइये गुरुके सबदि सलाह ।
राम नाम रति आसरन मरमुति नाह ॥

इत्युक्त लक्षणा प्राणि दुःख ध्वंसन तत्परा।
दया बलवतां शोभा न त्याज्या धर्मचारिभिः॥
पुण्योऽयं भारतोवर्षो हिन्दुस्थानः प्रकीर्तितः।
वरिष्ठः सर्व देशानां धन धर्म सुखप्रद॥
गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारत भूमि भागे।
स्वर्गापवर्गस्य च हेतु भूते भवन्ति भूयः पुरुषाः सुरत्वात्॥
मातृभूमिः पितृभूमिः कर्मभूमिः सुजन्मनाम्।
भक्ति मर्हति देशोऽयं सेव्यः प्राणै र्धनैरपि॥
चातुर्वर्ण्यं यत्र सृष्टं गुणकर्म विभागशः।
चत्वार आश्रमाः पुण्याः चतुर्वर्गस्य साधकाः॥
उत्तमः सर्वधर्माणां हिन्दू धर्मोऽयमुच्यते।
रक्ष्यः प्रचारणीयश्च सर्वलोकहितैषिभिः॥

अनुवाद

परमेश्वर को प्रणाम कर सब प्राणियों के उपकार के लिये, बुरा करने वालों को दाबने और दण्ड देने के लिये, धर्मस्थापन के लिये धर्म के अनुसार सङ्गठन मिलाप-कर गाँव गाँव में सभा करनी चाहिये। गाँव गाँव में कथा बिठानी चाहिये। गाँव गाँव में पाठशाला और अखाड़ा खोलना चाहिये।

और पर्व पर्व पर मिलकर महोत्सव मनाना चाहिये॥

सब भाइयों को मिलकर अनाथ की, विधवाओं की, मन्दिरों की और गौ माता की रक्षा करनी चाहिये, और इन सब कामों के लिये दान देना चाहिये॥

स्त्रियों का सन्मान करना चाहिये॥

दुखियों पर दया करनी चाहिये॥

उन जीवों को नहीं मारना चाहिये जो किसी पर चोट नहीं करते। मारना उनको चाहिये जो आततायी हों, अर्थात् जो स्त्रियों पर या किसी दूसरे के धन या प्राण पर वार करने हों या जो किसी

कबीरदास कृत रामनाम महिमा।

तजि अभिमान लेहु मन मोलि राम नाम हिरदै महँ तोलि
अब कहु राम भरोसा तोरा तब काहू का कौन निहोरा।
कहै कबीर जो खोजहु जहाना राम समान न देखहु आना।

कोइ गावै कोई सुनै हरीनाम चितलाय।
कह कबीर संसय नहीं अंत परमगति पाय॥

राम जपहु जिअ ऐसे ऐसे। ध्रुव प्रह्लाद जपेउ जिअ जैसे॥
राम राम जपि निरमल भए। जनम जनम के किलिविष गए॥
रमत राम जनम मरण नियारै। उचरत राम भव पार उतारै॥

रसना राम गुण रमि रमि पीजै। गुणातीत निर्मूलक लीजै॥
निरगुन ब्रह्म जपो रे भाई। जेहि सुमिरत सुधि बुधि सब पाई॥
विख तजि राम न जपसि अभागे। का बूडे लालच के आगे॥
ते सब तरे राम रस स्वादी। कह कबीर बूडे बकवादी॥
मनरे जरते राम कह्यो रे। फिरि कहिवे को कछु न रह्यो रे॥
का भो जोग जग्य जप दाना। जो तैं राम नाम नहिं जाना॥

काम क्रोध दोउ मारे। गुरु प्रसाद सब तारे॥
कह कबीर भ्रम नाशो। राम मिले अविनाशी॥

राम का नाम संसार में सार है राम का नाम अमृत बानी।
राम के नाम ते कोटि पातक टरे राम का नाम विस्वास माना॥
राम का नाम लै साधु सुमिरन करे राम का नाम लै भक्ति ठानी।
राम का नाम लै सूर सनमुख लरै पैठि संग्राम में युद्ध ठानी॥
है परम जोति औगुन निराकार है, तासु को नाम निरकार मानी।
रूप बिन रेख बिन निगम अस्तुति करे सत्त का राह अनकथ कहानी॥

पानी केरा पूतला राखा पवन मँझार।
नाना बानी बोलता जोति धरी करतार॥
एक शब्द में सब कहा सब ही अर्थ बिचार।
भजिये निर्गुन नाम का तजिये बिषै विकार॥

हर एक को उचित है कि यह चाहे कि सब लोग सुखी रहें सब नीरोग रहें, सबका भला हो। कोई दुःख न पावे। प्राणियों के दुःख को दूर करने में तत्पर यह दया बलवानों की शोभा है। धर्म के अनुसार चलने वालोंको कभी इसका त्याग नहीं करना चाहिये

यह भारतवर्ष जो हिन्दुस्तान नाम से प्रसिद्ध है—बड़ा पवित्र देश है। धन धर्म और सुख का देने वाला यह देश सब देशों से उत्तम है।

'कहते हैं कि देवता लोग यह गीत गाते हैं कि वे लोग धन्य हैं जिनका जन्म इस भारत भूमि में होता है, जिसमें जन्म लेकर मनुष्य स्वर्ग का सुख और मोक्ष दोनों को पा सकता है' ॥

यह हमारी मातृ-भूमि है, यह हमारी पितृ-भूमि है। जो लोग सुजन्मा हैं—जिनके जीवन बहुत अच्छे हुये हैं, राम, कृष्ण, बुद्ध आदि महापुरुषों के, महात्माओं के, आचार्यों के, ब्रह्मर्षियों और राजर्षियों के, गुरुवों के, धर्मवीरों के, शूरवारोंके, दानवीरों के, स्वतंत्रता के प्रेमी देश भक्तों के उज्ज्वल कामों की यह कर्म-भूमि है। इस देशमें हम को परम भक्ति करनी चाहिये और प्राणों से और धन से भी इसकी सेवा करनी चाहिये।

जिस धर्म में परमात्मा ने गुण और कर्म के विभाग से ब्राह्मण क्षत्री वैश्य शूद्र ये चार वर्ण उपजाये और जिसमें धर्म, अर्थ, काम और मोक्ष इन चारों पुरुषार्थों के साधन में सहायक मनुष्य का जीवन पवित्र बनाने वाले ब्रह्मचर्य, गृहस्थ, वानप्रस्थ और संन्यास ये चार आश्रम स्थापित हैं।

सब धर्मों से उत्तम इसी धर्म को हिन्दू धर्म कहते हैं। जो लोग सारे संसार का उपकार चाहते हैं उनको उचित है कि इस धर्म की रक्षा और इसका प्रचार करें।

प्रीयतां पुरुषोत्तमः ॥

ध्यान।

राम ब्रह्म चिन्मय अविनासी। सर्व रहित सब उरपुर वासी॥
आदि अन्त कोउ जासु न पावा। मति अनुमान निगम अस गावा॥
बिनु पद चलै सुनै बिनु काना। कर बिनु कर्म करै विधि नाना॥
आनन रहित सकल रस भोगी। बिनु वाणी वक्ता बड़ योगी॥
तन बिनु परस नयन बिनु देखा। ग्रहै घ्राण बिनु वास अशेखा॥
अस सब भाँति अलौकिक करणी। महिमा तासु जाइ किमि बरणी॥

दो०—जेहि इमि गावहिं वेद बुध जाहि धरहिं मुनि ध्यान।
सोइ दशरथ सुत भक्त हित कोशलपति भगवान॥

अगुण अरूप अलख अज जोई। भक्त प्रेमवश सगुण सो होई॥
जो गुण रहित सगुण सो कैसे। जल हिम उपल बिलग नहिं जैसे॥
जासु नाम भ्रम तिमिर पतङ्गा। तिहि किमि कहिय विमोह प्रसंगा॥
राम सच्चिदानन्द दिनेशा। नहिं तहं मोह निशा लवलेशा॥
सहज प्रकाश रूप भगवाना। नहिं तहं पुनि विज्ञान बिहाना॥
हर्ष विषाद ज्ञान अज्ञाना। जीवधर्म अहमित अभिमाना॥
राम ब्रह्म व्यापक जगजाना। परमानन्द परेश पुराना॥

दो०—पुरुष प्रसिद्ध प्रकाश निधि प्रकट परावर नाथ।
रघुकुलमणि मम स्वामि सोइ कहि शिव नायउ माथ॥

जब जब होइ धर्म की हानी। बाढहिं असुर अधम अभिमानी॥
करहिं अनीति जाइ नहिं बरणी। सीदहिं विप्र धेनु सुर धरणी॥
तब तब प्रभु धरि विविध शरीरा। हरहिं कृपानिधि सज्जन पीरा॥

दो०—असुर मारि थापहिं सुरन राखहिं निजश्रुति सेतु।
जग विस्तारहिं विशद यश राम जन्म कर हेतु॥

प्रार्थना

अगुण अखण्ड अनन्त अनादी। जेहि चिन्तहिं परमारथ वादी॥
नेति नेति जेहि वेद निरूपा। निजानन्द निरुपाधि अनूपा॥
सेवत सुलभ सकल सुखदायक। प्रणतपाल सचराचर नायक॥
जो अनाथ हित हम पर नेहू। तौ प्रसन्न है यह वर देहू॥
जो स्वरूप बस शिव मन माँहीं। जेहि कारण मुनि यतन कराहीं॥

छात्रवृत्तिदानमाहात्म्यम् ।

गारुडे—छात्राणां भोजनाभ्यङ्गं वस्त्रं भिक्षामथापि वा ।
दत्वा प्राप्नोति पुरुषः सर्वकामान्न संशयः ॥
विवेकी जीवितं दीर्घं धर्मकामार्थमाप्नुयात् ।
सर्वमेव भवेद्दत्त छात्राणां भोजने कृते ॥
वह्निपुराणे-यां वृत्तिं पठमानानां करोत्यनुदिनं नृप ।
स यज्ञफलमादत्ते दानाच्छादनभोजनैः ॥
भारते—कुलो तिष्ठति यस्यान्नं विद्याभ्यासेन जीर्यति ।
गोत्राणि तारयेत्तस्य दश पूर्वान् दशापरान् ॥

विद्यागुरु विश्वनाथ जी के असीम अनुग्रह से हिन्दू राज्यों के अधिपतियों ने तथा अन्य धार्मिक धनवान् श्रद्धावान् हिन्दुओं ने मिल कर पवित्र काशीधाम में लोकपावनी गङ्गा जी के तट पर एक ऐसा विश्वविद्यालय स्थापित किया है जो हिन्दुओं का मान बढ़ाने वाला है। इस विश्वविद्यालय में चारों वेद और वेदाङ्ग, व्याकरण, ज्योतिष, धर्मशास्त्र, इतिहास, पुराण, मीमांसा, न्याय, सांख्य योग, वेदान्त और मनुष्यों को सुख देने वाला आयुर्वेद तथा गान्धर्व वेद तथा नूतन धनुर्वेद बन्दूक चलाना आदि पढ़ाया और सिखाया जाता है। इसमें पश्चिम के देशों की अनेक विद्या तथा लोकयात्रा में उपकारी अनेक कला अर्थात् इञ्जिनिअरिङ्ग और व्यापारिक रसायन तथा अनेक प्रकार के विज्ञान बहुत अच्छी रीति से प्रेम से पढ़ाये जाते हैं। विद्यार्थियों को सहायता के लिए बहुत सी छात्रवृत्तियां दी जाती हैं। सब प्रान्त से आये हुए विद्यार्थी यहां छात्रावास में रह कर पढ़ते हैं जैसे प्राचीन समय गुरुकुल में विद्यार्थी रहते थे।

यहां विद्यार्थियोंको शारीरिक बल की वृद्धि के लिये व्यायाम करना आवश्यक रक्खा गया है और व्याख्यानों और कथाओं से धर्म का उपदेश दिया जाता है। जिन सज्जनों को और देवियों को हिन्दू नाम का अभिमान हो उनको उचित है कि प्रेम से दान से और प्रिय वचनों से इसकी सहायता करें। जो सज्जन विश्वविद्यालय की सहायता देना चाहें वे "मंत्री विश्वविद्यालय काशी" के नाम अपना दान भेजें।

श्री विश्वनाथो जयतु ॥

मदनमोहन मालवीयः ।

हिन्दू धर्मोपदेशः ।

संघे शक्तिः कलौ युगे ।

हिताय सर्वलोकानां निग्रहाय च दुष्कृताम् ।
धर्म संस्थापनार्थाय प्रणम्य परमेश्वरम् ॥
ग्रामे ग्रामे सभा कार्या ग्रामे ग्रामे कथा शुभा ।
पाठशाला मल्लशाला प्रतिपर्व महोत्सवः ॥
अनाथाः विधवाः रक्ष्याः मन्दिराणि तथा च गौः ।
धर्म्यं सङ्घटनं कृत्वा देयं दान च तद्धितम् ॥
स्त्रीणां समादरः कार्यो दुःखितेषु दया तथा ।
अहिंसका न हन्तव्या आततायी वधार्हणः ॥
अभयं सत्य मस्तेयं ब्रह्मचर्य धृतिः क्षमा ।
सेव्याः सदाऽमृतमिव स्त्रीभिश्च पुरुषै स्तथा ॥
कर्म्मणां फल मस्तीति विस्मर्तव्य न जातु चित् ।
भवेत्पुनः पुनर्जन्म मोक्षस्तदनुसारतः ॥
स्मर्तव्यः सततं विष्णुः सर्वभूतेष्ववस्थितः ।
एक एवाऽद्वितीयो यः शोकपापहरः शिवः ॥
'पवित्राणां पवित्रं यो मंगलानां च मगलम् ।
दैवतं देवतानां च लोकानां योऽव्ययः पिता' ॥
सनातनीयाः सामाजाः सिक्खाः जैनाश्च सौगताः
स्वे स्वे कर्मण्यभिरताः भावयेयुः परस्परम् ॥
विश्वासे दृढता स्वीये परनिन्दा विवर्जनम् ।
तितिक्षा मतभेदेषु प्राणिमात्रेषु मित्रता ॥
'श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
यदन्यैर्विहितं नेच्छेदात्मनः कर्म पूरुषः ।
न तत्परस्य कुर्वीत जानन्नप्रिय मात्मनः' ॥
न कदाचि द्विभेत्यन्याथ कंचन विभीषयेत् ।
आर्य वृत्ति समालंब्य जीवेत्सज्जन जीवनम् ॥
सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु माकश्चिद् दुःखमाग्भवेत् ॥

प्रकाशक—ज्योतिषाचार्य रामव्यास पाण्डेय, हिन्दू विश्वविद्यालय, काशी।

मुद्रक—माधव विष्णु पराडकर, ज्ञानमण्डल यन्त्रालय, काशी।

BHARATIYA VIDYA BHAVAN
S. N.

के घर में आग लगाते हों। यदि ऐसे लोगों को मारे विना अपना या दूसरों का प्राण या धन या धर्म न बच सके तो उनको मारना धर्म है ॥

स्त्रियों को भी, पुरुषों को भी, निडरपन, सचाई, चोरी न करना ब्रह्मचर्य, धीरज और क्षमा का अमृत के समान सदा सेवन करना चाहिये ॥

इस बात को कभी न भूलना चाहिये कि भले कर्मों का फल भला और बुरे कर्मों का फल बुरा होता है, और कर्मों के अनुसार ही प्राणी को बार बार जन्म लेना पड़ता है या मोक्ष मिलता है ॥

घट घट में बसने वाले भगवान् विष्णु का—सर्वव्यापी ईश्वर का सुमिरन सदा करना चाहिये, जिनके समान दूसरा कोई नहीं—जो कि एक ही अद्वितीय हैं, और जो दुःख और पाप के हरने वाले शिव स्वरूप हैं। जो सब पवित्र वस्तुओं से अधिक पवित्र, जो सब मंगल कामों के मंगल स्वरूप हैं, जो सब देवताओं के देवता हैं और जो समस्त संसार के आदि सनातन अज अविनाशी पिता हैं ॥

सनातनधर्मी, आर्यसमाजी, ब्रह्मसमाजी, सिक्ख, जैन और बौद्ध आदि सब हिन्दुओं को चाहिए कि अपने अपने विशेष धर्म का पालन करते हुए एक दूसरे के साथ प्रेम और आदर से वर्तें ॥

अपने विश्वासमें दृढ़ता, दूसरे की निन्दा का त्याग, मतभेद में (चाहे वह धर्म सम्बन्धी हो वा लोक सम्बन्धी) सहनशीलता, और प्राणीमात्र से मित्रता रखनी चाहिये ॥

सुनो धर्म के सर्वस्व को और सुनकर इसके अनुसार आचरण करो। जो काम अपने को बुरा या दुखदायी जान पड़े उसको दूसरे के साथ नहीं करना ॥

मनुष्य को चाहिये कि जिस काम को वह नहीं चाहता है कि कोई दूसरा उसके साथ करे, उस काम को वह भी किसी दूसरे के प्रति न करे। क्योंकि वह जानता है कि यदि उसके साथ कोई ऐसी बात करता है जो उसको प्रिय नहीं है, तो कैसी पीड़ा पहुँचती है।

चाहिये कि न कोई किसी से डरे, न किसी को डर पहुँचावे। श्रीमद्भगवद्गीता के उपदेश के अनुसार आर्य अर्थात् श्रेष्ठ पुरुषों की वृत्ति में दृढ़ रहते हुए ऐसा जीवन जीयें जैसा सज्जन को जीना चाहिये।

हर एक को उचित है कि यह चाहे कि सब लोग सुखी रहें, सब नीरोग रहें, सबका भला हो। कोई दुःख न पावे। प्राणियों के दुःख को दूर करने में तत्पर यह दया बलवानों की शोभा है। धर्म के अनुसार चलने वालोंको कभी इसका त्याग नहीं करना चाहिये।

यह भारतवर्ष जो हिन्दुस्तान नाम से प्रसिद्ध है—बड़ा पवित्र देश है। धन धर्म और सुख का देने वाला यह देश सब देशों से उत्तम है।

'कहते हैं कि देवता लोग यह गीत गाते हैं कि वे लोग धन्य हैं जिनका जन्म इस भारत भूमि में होता है, जिसमें जन्म लेकर मनुष्य स्वर्ग का सुख और मोक्ष दोनों को पा सकता है'॥

यह हमारी मातृ-भूमि है, यह हमारी पितृ-भूमि है। जो लोग सुजन्मा हैं—जिनके जीवन बहुत अच्छे हुवे हैं, राम, कृष्ण, बुद्ध आदि महापुरुषों के, महात्माओं के, आचार्यों के, ब्रह्मर्षियों और राजर्षियों के, गुरुवों के, धर्मवीरों के, शूरवीरोंके, दानवीरों के, स्वतंत्रता के प्रेमी देश भक्तों के उज्ज्वल कामों की यह कर्म-भूमि है। इस देशमें हम को परम भक्ति करनी चाहिये और प्राणों से और धन से भी इसकी सेवा करनी चाहिये।

जिस धर्म में परमात्मा ने गुण और कर्म के विभाग से ब्राह्मण क्षत्री वैश्य शूद्र ये चार वर्ण उपजाये और जिसमें धर्म, अर्थ, काम और मोक्ष इन चारों पुरुषार्थों के साधन में सहायक मनुष्य का जीवन पवित्र बनाने वाले ब्रह्मचर्य, गृहस्थ, वानप्रस्थ और संन्यास ये चार आश्रम स्थापित हैं।

सब धर्मों से उत्तम इसी धर्म को हिन्दू धर्म कहते हैं। जो लोग सारे संसार का उपकार चाहते हैं उनको उचित है कि इस धर्म की रक्षा और इसका प्रचार करें।

प्रीयतां पुरुषोत्तमः ॥

काशी हिन्दू विश्वविद्यालयः।

प्रसादाद्विश्वनाथस्य काश्यां भागीरथीतटे।
विश्वविद्यालय श्रेष्ठो हिन्दूनां मानवर्धनः॥

हिन्दूराज्याधिपतिभिर्धनिकैर्धार्मिकैस्तथा।
मिलित्वा स्थापितः सद्भिर्विद्याधर्मविवृद्धये॥

यत्र वेदाः सवेदांगाः धर्मशास्त्रं च पावनम्।
इतिहासः पुराणश्च मीमांसा न्याय विस्तरः॥

सांख्ययोगो च वेदान्त आयुर्वेदः सुखावहः।
गांधर्ववेदो मधुरो धनुर्वेदश्च नूतनः॥

आङ्ग्लं दण्डविधानञ्च दायभागादि संयुतम्।
पाश्चात्या विविधा विद्यास्तथा लोकहिताः फलाः॥

पाठ्यन्ते विधिवत्प्रेम्णा विज्ञानानि बहूनि च।
साहाय्यार्थं च छात्राणां दीयन्ते वृत्तयस्तथा॥

सर्वप्रान्तसमायाताश्छात्राः विद्याभिलाषिणः।
वसन्ति सुखिनो यत्र पुरा गुरुकुले यथा॥

नित्यं निषेव्यते यत्र व्यायामः शक्तिवर्धनः।
व्याख्यानैश्च कथाभिश्च धर्मो यत्रोपदिश्यते॥

पोष्यः संवर्धनीयश्च हिन्दूनामभिमानिभिः।
स्त्रीभिश्च पुरुषैस्सर्वैः प्रेम्णा दानेन सूक्तिभिः॥

छात्रवृत्तिदानमाहात्म्यम् ।

गारुडे—छात्राणां भोजनाभ्यङ्गं वस्त्रं भिक्षामथापि वा ।
दत्वा प्राप्नोति पुरुषः सर्वकामान्न संशयः ॥
विवेकी जीवितं दीर्घं धर्मकामार्थमाप्नुयात् ।
सर्वमेव भवेद्दत्तं छात्राणां भोजने कृते ॥

वह्निपुराणे-यां वृत्तिं पठमानानां करोत्यनुदिनं नृप ।
स यज्ञफलमादत्ते दानाच्छादनभोजनैः ॥

भारते—कुक्षौ तिष्ठति यस्यान्नं विद्याभ्यासेन जीर्यति ।
गोत्राणि तारयेत्तस्य दश पूर्वान् दशापरान् ॥

विद्यागुरु विश्वनाथ जी के असीम अनुग्रह से हिन्दू राज्यों के अधिपतियों ने तथा अन्य धार्मिक धनवान् श्रद्धावान् हिन्दुओं ने मिल कर पवित्र काशीधाम में लोकपावनी गङ्गा जी के तट पर एक ऐसा विश्वविद्यालय स्थापित किया है जो हिन्दुओं का मान बढ़ाने वाला है। इस विश्वविद्यालय में चारो वेद और वेदाङ्ग, व्याकरण, ज्योतिष, धर्मशास्त्र, इतिहास, पुराण, मीमांसा, न्याय, सांख्य-योग, वेदान्त और मनुष्यों को सुख देने वाला आयुर्वेद तथा गान्धर्व वेद तथा नूतन धनुर्वेद बन्दूक चलाना आदि पढ़ाया और सिखाया जाता है। इसमें पश्चिम के देशों की अनेक विद्या तथा लोकयात्रा में उपकारी अनेक कला अर्थात् इञ्जिनिअरिङ्ग और व्यापारिक रसायन तथा अनेक प्रकार के विज्ञान बहुत अच्छी रीति से प्रेम से पढ़ाये जाते हैं। विद्यार्थियों को सहायता के लिए बहुत सी छात्रवृत्तियां दी जाती हैं। सब प्रान्त से आये हुए विद्यार्थी यहां छात्रावास में रह कर पढ़ते हैं जैसे प्राचीन समय गुरुकुल में विद्यार्थी रहते थे।

यहां विद्यार्थियोंको शारीरिक बल की वृद्धि के लिये व्यायाम करना आवश्यक रक्खा गया है और व्याख्यानों और कथाओं से धर्म का उपदेश दिया जाता है। जिन सज्जनों को और देवियों को हिन्दू नाम का अभिमान हो उनको उचित है कि प्रेम से दान से और प्रिय वचनों से इसकी सहायता करें। जो सज्जन विश्वविद्यालय को सहायता देना चाहें वे "मंत्री विश्वविद्यालय काशी" के नाम अपना दान भेजें।

श्री विश्वनाथो जयतु ॥

मदनमोहन मालवीयः ।

पुस्तक मिलने का पता
सनातनधर्म महासभा कार्यालय,
हिन्दू विश्वविद्यालय, काशी।

प्रकाशक—ज्योतिषाचार्य रामव्यास पाण्डेय, हिन्दू विश्वविद्यालय, काशी।

मुद्रक—माधव विष्णु पराड़कर, ज्ञानमण्डल यन्त्रालय, काशी।